जातीयद्रव्यमित्याहिवाक्यस्य स्वरसतो ऽप्रयोगात् तज्जातीयार्थकपदस्य समभिव्याहृतपदोपस्थाप्यक्षमंच्या
पज्जातास्वासाजात्यपरतया श्रोतृसार्गिकत्वादिति भावः। जातिघटनायाश्च प्रयोजनं तत्र स्वापि द्रष्टव्यमिति एवं चेति ट
घक प्रयोजकत्वेपि अनुमितित्वरूपितविभिन्नकारणतावच्छेदकशरीरे विशेषणरूपेणाप्रवेशेपि। नन्वत्रोक्तिः न
एकतरघटितलक्षणकरणे अपरव्याप्तिज्ञानजन्यानुमितावव्याप्तिः एकतरव्याप्तिज्ञानजन्यजातीयत्वस्या
परव्याप्तिज्ञानजन्यानुमितावसत्त्वादिति भावः। कार्य्यतासामानाधिकरण्यस्यानेकार्य्यतावच्छेदकत्वनिवे
शनेज्ञातावनुभवत्वव्याप्यत्वविशेषणं विनैवसत्वादिवारणसंभवात्तादृशजातीनां परामर्शजन्यताव
च्छेदकको धर्मविशिष्टत्वात् अनुमितित्वस्यैव च तथात्वादित्याशयेनाह पर्वतोग्निव्याप्यपक्षविशिष्यकपरामर्श
योरनुगतरूपेणाहेतुतायामतो तद्रूपावच्छिन्नजन्यतयैव ज्ञानान्तराणि व्यासज्यवृत्तिकार्य्यतादृशकारणताघ
टितप्रथमकल्पे व्याप्यविषयकत्वानिवेशः अवच्छेदकत्वस्य पर्य्याप्तिनिवेशाद्विषयविशेषविषयकत्वस्या
धिकस्य परामर्शजन्यतावच्छेदकत्वेपि असंभवः समुदायस्य एकदेशानतिरिक्ततया समुदायस्यावच्छेदक

विषयविशेषविषयत्वेरवच्छेदकत्वमित्यर्थः

त्वेनतदेकदेशस्यापि तथात्वस्याव्याहतत्वात् अत एवावच्छेदककोटिप्रविष्टवह्नित्वादिजातिमादाय वह्न्यादिरूपविषये
निव्याप्तिवारणाय तानवाच्येति ज्ञानेसमवेतेत्यर्थः अथवह्नित्वादिकमवच्छेदकविशेषणतया अवच्छेदकतापा
वावच्छेदकं न तु कार्य्यतायां तथा च कथं तज्जातिमादाया तिव्याप्तिप्रसक्तिः न च तादृशछिन्नविधेयताकत्वसंबंधे
न कार्य्यविशेषणतया वह्नित्वमपि कार्य्यतावच्छेदकमिति वाच्यं तादृशपरंपरायाः संबंधत्वे मानाभावात् विषयि
तासंबंधेन च वह्नित्वस्यातिप्रसक्ततया अवच्छेदकत्वायोगादिति चेन्न अवच्छेद्यांशे विसादृश्यं यत्र तावन्मावंति
विशेषणानि तावत्स्वेव कार्य्यतावच्छेदकत्वोपगमे बाधकाभावात् कार्य्यतावच्छेदकादिविशेषणस्य कार्य्यतादौ तदव
च्छेदकत्वे वा अवच्छेदकत्वमित्यत्र विनिगमकाभावेपि न ज्ञानत्वादिरित्यादिविषये पर्य्याप्तेन च व्यधिकरणस्यानवच्छेदकत्व न
नियमादिदिषयत्वेर्न कार्य्यतावच्छेदकत्वसंभ [illegible] व इति वा
च्यं साक्षात्तदवच्छेद्याश्रयविशेषणतया विलक्षणावच्छेदकतापामेव सामानाधिकरण्यापेक्षणात् अवच्छेदकघट
कानां मिदेपि अवच्छेद्यत्तानतिरूपितया अवच्छेदकतापर्य्याप्त्यधिकरणया दृशां तादृशप्रकारकावच्छेद्याश्रयवि
षयतया अभेदादवच्छेद्यकार्य्यतादेरभेदइति वह्निविधेयकानुमितिः परामर्शजन्या उक्तकारणभावमहेत्वनुमिति

७५

गदाधरी०

विषयतायाऐक्यात्कार्य्यकारणभावैक्यं अनुमितित्वव्यापकविधेयकानुमितिः परामर्शजन्यत्वाकारेण कार्यताप्रतीतिः

६१ [redacted] अनुमितित्वव्यापकत्वावच्छेदकत्वे लक्षणे प्रवेशनेयत्वात् समुदायेय पापि

नेकमवच्छेदकत्वं तथापि तत्कार्य्यतानिरूपितावच्छेदकत्वेन तावदवच्छेदकतानां व्यासज्यवृत्तित्वेन बाधकाभावः तादृश

तुगतरूपावच्छिन्नावच्छेदकत्वाधारतायाः समुदायवृत्तिधर्मे गौरवावच्छेदकत्वलंघपल्लवेनानादृशजातिमज्ज्ञानस्य

लक्षणत्वेसामानाधिकरण्यसंबंधेन तादृशजातिवैशिष्ट्यस्य ज्ञानत्वविषयवृत्तिधर्मेपि सत्वेन तद्यावर्त्तनाय ज्ञान त

त्वस्य निवेशे ज्ञानत्वत्वस्याप्यवश्यं निवेशनीयतया गौरवमिति तदुपेक्षितं ज्ञानत्वाद्यवच्छिन्नसाध्यकादिपरामर्श

जन्यताघटितं ज्ञानवृत्तिजातिमात्रोपलक्षणं दुष्करं तत्र विषयवृत्तिज्ञानत्वादिजातिमादायातिव्याप्तेर्दुर्वारत्वादि रा

तितादृशपरामर्शजन्यताघटितमपि लक्षणं संभवतीति सूचयितुं ज्ञानवृत्तित्वविशिष्टयाप्यस्य तत्कल्पं तरमाना

धिकरण्येनवेति [redacted] कार्य्यविशेषणतयाविल

क्षणमवच्छेदकत्वमिह सामानाधिकरण्येनावच्छेदकत्वं अतो ज्ञानत्वादेः कार्य्यतासमानाधिकरणत्वेपि न क्षतिः राम०

यत्तु आलोकादिलिंगकानुमितेः धूमादिलिंगकपरामर्शस्य व्यभिचारवारणाय तत्समानाधिकरणतत्तल्लिंगकपरा ६९

अनुमानादेः

हसा४

अनुमानलक्षण

प्रत्यक्षादाव मर्शाव्यवहितोत्तरत्वं तत्तल्लिंगकपरामर्शजन्यतावच्छेदकमवश्यं वाच्यं तथा च परामर्शविशेषणतया ज्ञानत्वस्य परा

र्शजन्यतावच्छेदकत्वात्तद्वारायातिप्रसंगवारणाय सामानाधिकरण्येनेति कल्पानुसरणमिति तन्न साधीयः अव्यव

हितोत्तरत्वस्य कार्य्यतावच्छेदकत्वेऽनुमितित्वनिवेशस्य निष्प्रयोजनकतयाऽसंभवप्रसंगात् न चाव्यवहितोत्तरत्वनि

वेशेप्यव्यभिचारः प्रसज्यते येन तद्वारकतया अनुमितित्वनिवेशनं सार्थकीभवेत् अथानुमितित्वाप्रवेशे धूमपराम

र्शाव्यवहितोत्तरोत्पन्नतत्समानाधिकरणात्मघटसंयोगादिद्वाराद्यधिकरणे घटादौ परामर्शाभावेन व्यभिचारः इत्यनुमिति

[redacted] त्वनिवेशः सार्थकः अव्यवहितोत्तरत्वनिवेशे विषयविशेषावगाहितायाः प्रयोजनाभावेनानिवेशात् न च ७५

कार्य्यनिरूपितं देशिकव्यापकत्वं नकारणतावच्छेदकं अपि तु कार्य्यतावच्छेदक[redacted]व्यापकसामानाधिकरण्यप्रति

योगित्वं अत एव क्रियानधिकरणे तद्देशे संयोगोत्पन्नापि तस्यास्तत्कारणत्वमिति वाच्यं प्रकृते कार्य्यनिरूपितदेशि

कव्यापकतायाः कारणतावच्छेदकत्वे कार्य्याधिकरणदेशत्वस्य कारणाधिकरणदेशत्वनियतत्वानिर्वाहात् क्रियाधिक

रणेऽसमवायिकारणसंयोगोत्पत्तौ तदनधिकरणे तद्देशे तादृशपरामर्शाधिकरणात्मवृत्तिदनधिकरणेपि सिद्ध्यभावा

दिघटितानुमितिसामग्र्या आत्मन्येनुमित्युत्पादसंभवादिति चेत् सत्यं अनुमितित्वमनिवेश्य स्वसमानाधिकरणपराम

र्शाव्यवहितोत्तरत्वस्य जन्यतावच्छेदकत्वे संयोगादिविशेषे व्यभिचारः स्यात् तद्वारणाय अव्यवहितपूर्ववर्त्तिपराम स्वा

ग॰टी॰प॰ र्सामानाधिकरण्यमेव विशेषणं तथा तज्जन्यतावच्छेदकमुपेयतां तथा च तद्विशिष्टाधिकरणं परामर्शाधिकरणमे
वेति तदुपलक्षितस्य संयोगादेः परामर्शव्यभिचारित्वेऽपि तद्विशिष्टाधिकरणताघटितव्यापकताया मर्मकारणत्वमक्षत
७० मित्यनुमितित्वे यावन्निर्वाह इत्यालोच्य दीधितिकृता पक्षताग्रन्थे एककालावच्छिन्नत्वविशिष्टितसामानाधिकरण्य
संबंधेन सिद्धौ सिसाधयिषाविरहवैशिष्ट्यमित्यभिधानं संगच्छते अत एव पक्षतायाः अतीन्द्रियपक्षणपदितत्वेना
तीन्द्रियतया प्रत्यक्षासंभवाभिप्रायेण विशेष्याद्यभावरूपासा इति तदभिधानस्यापि संगतिः एवं चानुमितित्वस्य परा
मर्शजन्यतावच्छेदककोटावप्रवेशेऽपि नोक्तव्यभिचारप्रसंगः घटादेर्यत्परामर्शाधिकरणता नियततया तदुपलक्षिता
धिकरणताविलक्षणायाः सामानाधिकरण्यघटितसंबंधेन परामर्शविशिष्टाधिकरणतायाः असत्त्वात् नापि विनश्य
दवस्थपरामर्शजन्यानुमित्यधिकरणतायाः कारणताघटकव्याप्यतायामनिवेशे तस्याः परामर्शरूपकारणानियम्यता
तस्या इति दूषणस्याप्यवकाशः तदधिकरणताया अपि विशिष्टाधिकरणतात्वेन तादृशप्रवेशासंभवात् स्ववृत्ति
त्वस्ववृत्तिध्वंसाद्विपरामर्शाव्यवहितोत्तरत्वोभयसंबंधेनात्मविशिष्टत्वमेव धर्मा हि परामर्शजन्यतावच्छेदक
म् तावतात्मन्यलिंगकानुमितौ तस्य व्यभिचारवारणादात्मवृत्तित्वविशिष्टस्येवाधेयतया आत्मविशिष्टस्याप्ये राम॰
नात्मन्यवृत्तिरिति ज्ञानत्वादिकं निवेश्यापि संयोगादौ व्यभिचारवारणसंभवात् विनिगमनाविरहेण तस्यापिकाप्येतानत ७०

अ५पि॰नि॰लें॰

छेदकतायां दुर्वारत्वात् तत्प्रसंगात् तच्चाव्यवहितप्राक्क्षणावच्छिन्नत्वलिंगकपरामर्शाधिकरणताविशिष्टसमवाय
त्वलिंगकपरामर्शजन्यतावच्छेदकसंबंधे एवं च षष्ठ्यर्थमनुमितित्वमेव तज्जन्यतावच्छेदकमुक्तं ज्ञानत्वादिकं च नित्यसाधारणा
मिति न तस्य तथात्वसंभव इति वाच्यं तथा सति ज्ञानत्वस्य कार्यतावच्छेदककोटिप्रवेशे न तद्वारकविशेषणोपादानानु
पपत्तेः तस्मात् पक्षसाध्यपक्षकानुमितिरेकलिंगकपरामर्शजन्येव प्रसिद्धा तत्पक्षकतत्साध्यव्याप्यपरामर्शजन्यता
घटितमेव लक्षणमभिमेतं पर्वतादिपक्षमपि तस्य साध्यमेव तत्र च न परामर्शविशेषणतया ज्ञानत्वस्य जन्यतावच्छे
दकप्रवेशप्रसक्तिरिति ननु विशिष्टवैशिष्ट्यबोधातिव्याप्तिवारणाय नानापदार्थघटितगुरुतरव्याप्तिविषयकत्व
निवेशनमयुक्तं अभावत्वादिपक्षलिंगविच्छ्यासिद्धकपदार्थीविषयकत्वं निवेश्यापि तद्वारणसंभवात् ज्ञातिमत्त्वघटकस्या
अभावाद्यनुमितेरपि संग्रहादिति आशयेनाह व्याप्तिज्ञानमिति व्याप्तिज्ञानविषयतद्घटकपदार्थताविषयत्वनिवेशे ३४मान
ध्यतिव्याप्तिर्दुर्वारत्वात् वह्निमानिति अनुमितौ नियमतो भासमानव्याप्तिघटकसाध्यादिविषयकत्वनिवेशस्यासंभव
संपादकत्वात् संभवदुक्तत्वात् तस्मात् दृशानुमितिविषय इति। प्रकृतसाध्यकपक्षलिंगविशेषणानुमितिविषयस्यार्थः यत्किंचिदनु
मितिविषयतायाः प्रकृतसाध्यादिसाधारणत्वात् सामान्यतोऽनुमितिविषयतायाः प्रकृतसाध्यकयावत्त्वमेव विशे
ष्यकस्मदुक्तत्वं वना अनुमितिविषयतायाश्च केवलान्वयित्वात् प्रकृतसाध्यकेतियत्किंचिदिति चातिव्याप्त्यसंभवयोर्वा

(असिद्धत्वात्)

९२

ग०४० रकतामावच्छिन्नमिवोक्ति ~~तुमितेरिति~~ भंगाभिधानानां निवेशस्तु तादृशपदार्थस्यैकस्य विशिष्यैवैतस्य वक्तुमशक्यत्वात् अनुभवत्वव्याप्यज्ञा
तिघटितलक्षणे परामर्शत्वावच्छिन्नकारणताप्रतियोगिकव्याप्यविषयकत्वनिकार्यताशालित्वेन कतिपयानुमितीनां नि
९२ तत वेशनमयुक्तं तच्छक्तीनां एकानुमितिव्यक्तिमुपादायानुभवत्वव्याप्यजात्यात तच्छक्तिज्ञातीयत्वस्यापि लघोर्लक्षणत्वसंभ अनुमितेन
वात्तथापि तादृशजातिघटितलक्षणं तथैव निष्कर्षयति याकाचिदिति अनुभवत्वस्यैतच्छक्तित्वावच्छिन्नप्रतियोगि
ताकएवभेदो निविष्टः न त्वनुभवत्वत्वावच्छिन्नप्रतियोगिताकः अनुभवत्वशरीरसकलानुभवसमवेतत्वस्य निवेशिता तत्
तत्तद्व्यक्तित्वावच्छिन्नभेदनिवेशेनैवानुभवत्वज्ञानत्वादिसकलव्यापकजातिवारणासंभवे भेदप्रतियोगितावच्छेदकशरीरे अभि
कानुभवेतरासमवेतत्वनिवेशनेनानुमितित्वं तस्य ज्ञानत्वादिसाधारण्यं संपाद्यत इत्यारणायानुयोगिन्यनुभवान्यासमवेतत्वरूप
विशेषणान्तरप्रवेशस्य प्रक्षालनाद्वीसादिव्याप्यविषयत्वात् तद्व्यक्तिसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वस्य लक्षणस्य
संभवेपि न क्षतिः अनुभवत्वव्याप्यताघटितपूर्वलक्षणस्यैवेदानीं निष्कर्षणात् तद्व्यक्तिपदेन प्रत्यक्षादिव्यक्तिमुपादा तप
य उक्तशब्देन प्रत्यक्षादिलक्षणमपि संभवतीत्याशयेन प्रत्यक्षाद्यसमवेतत्वं नोपात्तमिति केचिन्न तद्व्यक्तिसमवेत तथ
पाक्तिंचिदनुभवासमवेतधर्मसमवायित्वमित्येकशब्देन प्रमाचतुष्टयलक्षणासंभवात्तथानभिधाने बीजानुयोगस्य रा.म०
तावतादृष्परीहारात् धर्मसमवायित्वमिति समवायेन तद्वत्त्वमित्यर्थः यथाश्रुते कालिकादिसंबंधेन तादृशानुमितित्वे ९२

न्यवा

समवायस्यातिव्याप्तत्वतया संबंधविशेषेण समवायवत्त्वानिवेशस्यावश्यकत्वे समवायस्यैव संबंधतया उचितत्वात् तानन्त
नुभवत्वचतुष्टयसाधारणजातिरमाणिकी प्रत्यक्षत्वस्यैव विशेषणधीजन्यतावच्छेदकत्वसंभवादिति निरस्तं न्यज्ञानत्वमि
वानुभवत्वं तथा चानुभवत्वानुभवत्वविशिष्टे सामयुक्तं स्मृत्यन्यत्वविशिष्टस्यापि ज्ञानत्वस्य ज्ञानत्वानतिरिक्ततया विशेषणा
न्तरेण वारितत्वात् एवमनुभवत्वस्य समवेतेति स्मरणान्यज्ञानान्यासमवेतेत्यर्थकेन तत्र स्मरणभिन्नज्ञानत्वनिवेशनमनतिप्र
योजकं ज्ञानान्यसमवेतघटत्वादिस्तत्र तत्र समवेतत्वविशेषणेनैव वारणात् स्मरणातस्मरणान्यान्यत्वेन स्मृतुपादानम
पि न किंचित् उपाधिवक्त्र्योः न घट इति कश्चिद्दृष्टीतिन्यायेनायुक्तमिति तन्नाहानुभवत्वेति अनुभवत्वजात्यंगीकर्तृमते
(षो अनुभवान्यत्वविशेषणस्यानुभवत्वव्याप्त्याख्यानावश्यकतया तदनंगीकारेतिविशुक्तं मूले केवलक्षणे च कवर्त्तिव्याख्यान
मुपन्यस्यति व्याप्तीति व्याप्तिज्ञानत्वावच्छिन्नेति धूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तिप्रकारकनिश्चयत्वावच्छिन्ने
त्यर्थः विशिष्टपरामर्शत्वावच्छिन्नेति वह्निव्याप्यप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छिन्नेत्यर्थः
धूमादिलिंगकवह्न्याद्यनुमितौ धूमो वह्निव्याप्य इत्याकारकव्याप्तिप्रकारकनिश्चयस्य करणादिकपाहेतुत्वं तज्ज्ञानतावच्छे
८ दकं धूमलिंगकवह्निविधेयकानुमितित्व वह्निव्याप्यधूमवान्पर्वत इत्याकारकपरामर्शस्य च तदुपाधार विषयतानिज्ञानावच्छेदकस्य कारणत्वं

लि

१८

ग.५० र्वतत्वावच्छिन्नसकवह्नित्वावच्छिन्नविषेपकधूमलिंगकानुमितित्वं एवंच धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारक
७२ निश्चयत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकीभूतोपदर्शितधर्मावच्छिन्नाव्याप्यप्रकारतानिरूपितपर्व धूम
तत्वावच्छिन्नविशिष्यताकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिकाचपर्वतोवह्निमानित्येतादृशानुमितिनिष्ठकार्यता
तादृशकार्यत्वसमानाधिकरणानुभवत्वव्याप्यत्वानिश्चयानुमितित्वजातिरित्वतामादायसकलानुमितौलक्षणस
मन्वयः वह्निव्याप्यधूमवत्पर्वतवानित्यादिविशिष्टवैशिष्ट्यबोधवृत्तितथाविधनिश्चयत्वावच्छिन्नविशेषणतावच्छे
दकप्रकारकज्ञानीयकारणताप्रतियोगिककार्यताशालायातिप्रसंगस्यवारणायावच्छिन्नांतं तथाचवह्निव्याप्ति
विशिष्टावच्छिन्नपर्वतप्रकारताशालिज्ञानत्वावच्छिन्नतादृशकार्यतायां धूमत्वावच्छिन्नविशेष्यकवह्निव्याप्तिप्रका
रकनिश्चयत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकावच्छिन्नत्वाभावान्नतामादायातिप्रसंगः वह्निव्याप्य
धूमवान्पर्वत इत्येतादृशनिश्चयत्वावच्छिन्नकारणतायाअपि धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारकतादृशनि वह्नि
श्चयत्वनिरूपिततादृशकारणतानिरूपितकार्यतावच्छेदकावच्छिन्नतामादायातिप्रसंगस्यनतादृशनिश्चयत्वनिरू राम०
पयहायतादृशनिश्चयत्वावच्छिन्नत्वनिवेशनं तादृशनिश्चयत्वान्यूनवृत्तित्वं नदर्थः अन्यथावह्निव्याप्यधूमवा ७२

दृशकार्य

[illegible]त्पर्वतइत्यादिविशेषणतावच्छेदकप्रकारकनिश्चयस्यवह्निव्याप्तिप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशा धूमत्वावच्छिन्न
लिनिश्चयत्वेनपर्वतत्वावच्छिन्नविशेषणतायन्न धूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तिप्रकारताशालिनिश्च रतातिकप
यत्वेनचविनिगमनाविरहेणहेतुत्वादधिकंत्वित्यादिनायेनतादृशनिश्चयहेतुतायाअपितथाविधनिश्चयत्वावच्छि
न्नतयाततनिरूपितकारणतामादायातिप्रसंगवारणासंभवात्तादृशनिश्चयत्वान्यूनवृत्तित्वनिवेशेचवह्निव्याप्यधू
मवान्पर्वतइत्येतादृशविशेषणतावच्छेदकप्रकारकनिश्चयहेतुतायावह्निव्याप्यधूमइत्येतादृशनिश्चयत्वेनापि नि
रूपितादृशनिश्चयत्वन्यूनवृत्तित्वेननदोषः वह्निव्याप्यधूमवत्पर्वतवानित्येतादृशविशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नकार्य
तायाअपिधूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नायाविशेषणतावच्छेदकप्रकारकनिश्चयविध
याकारणताप्रतियोगिकव्याप्तिविशिष्टधूमवैशिष्ट्यावगाहिबोधनिष्ठकार्यतासमानाधिकरणत्वात् उक्तातिप्रस
ङ्गवारणासंभवेनतादृशकार्यतासमानाधिकरणपदमपहायतदवच्छेदकावच्छिन्नत्वनिवेशनं एवंचतादृशव्याप्तिप्र
कारकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकीभूतवह्निव्याप्यवच्छिन्नधूमविशेषणताकबुद्धित्वाव नवह्निव्याप्तिविशि
च्छिन्नाः कार्यतायाः अनवच्छिन्नत्वान्नातिप्रसंगः अयेचमपिवह्निव्याप्यत्वावच्छिन्नधूमविशेषणताकबुद्धित्वाव ष्टधूमावच्छिन्न तविशेषणताक बुद्धित्वावच्छिन्न

१९

गदाधरी· छिन्नजन्यतावच्छेदकताघटकेन वृत्तित्वेन वह्निव्याप्यत्वविशिष्टधूमावच्छिन्नपर्वतविशेषणताकबुद्धित्वावच्छि
न्नजन्यतायाः अवच्छिन्नत्वान्नोक्तातिप्रसंगवारणसंभवः न च तदवच्छेदकावच्छिन्नेत्यत्र तदवच्छेदकपदस्यावच्छे
७३ दकतापर्याप्त्यधिकरणत्वपरत्वात् तावच्छेदकैकदेशज्ञानत्वावच्छिन्नत्वमादायातिप्रसंगादित्युक्तावाच्यं समुदायस्य
एकदेशानतिरिक्तत्वात् समुदायस्य तथात्वे एकदेशस्यापि तथात्वमित्यस्य अशक्यमात्रत्वात् इति चेन्न तदवच्छेदकावच्छि
न्नत्वस्य तत्रावच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिनिरूपकावच्छेदकताकत्वं विवक्षितं न्यूनाधिकपदार्था
नो वच्छिन्नजन्यतयोरवच्छेदकत्वे च नैकधर्मावच्छिन्नपर्याप्तिके न्यूनाधिकवृत्तिभ्यां तावत्पदार्थसमुदायत्वाभ्यामे
व वतत्पर्याप्त्यवच्छेदादिति नातिप्रसंगः प्रकृते च व्याप्तिनिश्चयनिरूपितजन्यतावच्छेदककुक्षिनिविष्टपदार्थानां
न्यूनाधिकभावविरहेण एकेनैव समुदायत्वेन तदुभयावच्छेदकतापर्याप्तिरवच्छिद्यते अतो नासंभवः अथ ध
मो वह्निव्याप्य इत्येतादृशव्याप्तिनिश्चयस्य धूमलिंगकानुमितित्वमेव जन्यतावच्छेदकमुपेयते न तु तत्र सविष पद
क यत्वांतर्भावः तथा सत्यनंतपक्षभेदेन तत्कारणताकल्पनाप्रसंगात् वह्निव्याप्यधूमवान्पर्वत इति परामर्शज ताप०
न्यतावच्छेदककोटौ पर्वतविषयत्वांतर्भावश्चावश्यकः अन्यपक्षकानुमितेस्तदहेतुत्वात् न लक्षणतादृशजन्य ७३

के वह्निविषयक

सेयमित्यर्थ १

नेतितत्तात्पर्यसिद्धान्वयः । हेतुतावच्छेदकसंबंधः नदोष इति हेतुतावच्छेदकसंबंधानिवेशे वह्निमान् धूमादित्यत्र धूमाभाव
स वत्संयुक्तत्ववृत्तिन्नासावप्रतियोगितायाः धूमाभाववत्समवेतघटादिनि तस्यासामान्यतो धूमाभाववद्वृत्तित्वं तस्य व्याप
कत्वेन तादृशाभावस्य लक्षणघटकत्वानुपपत्तेः धूमाभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्य तद्वृत्तित्वसामान्याभा
वस्य धूमाभाववत्समवेतवृत्तित्वे सत्ताद्यव्याप्तिः प्रसज्यते हेतुतावच्छेदकसंबंधनिवेशे च नि हेतुसंयुक्तत्वावच्छि
व न्नाभावस्यैव प्रतियोगिता तादृशसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्य लक्षणघटकत्वात्तमादा
य लक्षणसमन्वय इति भावः । हेतुतावच्छेदकसंबंधेन साध्याभाववद्वृत्तित्वविवक्षणे च सतीति शेषः । तद्वि
वक्षणे च वक्ष्यमाणाप्रसिद्धिविरहादुपपन्नसंगतिः हेतुतावच्छेदकसंबंधेन कस्यचिदधिकरणत्वमिति अनुयो
गितासंबंधेन हेतुतावच्छेदकसंबंधवृत्तित्वमित्यर्थः अथवा हेतुतावच्छेदकसंबंधेन धर्मवृत्तित्वमित्यर्थः । विशिष्य
हेतुतावच्छेदकपुरस्कारेण हेतुमत्त्वनिवेशनसंभवेपि बहुपदार्थघटितहेतुतावच्छेदकस्वरूपकधर्मत्वेन निवेशा
पेक्षया तेन रूपेण निवेशे गौरवमिति सामान्यतो निवेशलाघवाय कस्यचिदित्युक्तमिति । अथ द्रव्यं गुणकर्मान्य
त्वे सतीति सत्ताद्यव्याप्तिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि साध्याभावस्य सत्ताद्यनुरूपहेतुसामा
नाधिकरण्यसंभवेपि हेतुतावच्छेदकविशिष्टहेतुसमानाधिकरणनिरुक्तसाध्याभावानां व्यधिकरणधर्मावच्छि
न्नप्रतियोगिताकत्वनियमात् तादृशहेतुसमानाधिकरणत्वेनाभावविशेषणे केवलव्यधिकरणधर्मावच्छि

गा॰टी॰सि॰
७४

भ्रमतियोगिताकत्वरूपैवैवसाध्यस्य विवक्षणं संभवतीति तन्निवेशनमेवोचितमिति चेन्न तत्त्वासिद्धितादृशयाव
त्साध्याभावसजातीयवत्त्वस्यैव लक्षणत्वं संभवतीति व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नाभावस्यापि
विशिष्टहेतुसमानाधिकरण्यात्तेन लक्षणघटकतया तद्घटकयावत्साध्याभावसजातीयाप्रसिद्धेर्यावत्तु व्याप्तिविरहात्
तद्धेतौ तादृशयावत्साध्याभावसजातीयव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयत्किंचिदभावमादायैव लक्षणस
मन्वयसंभवादिति साध्याभाववद्वृत्तिसाध्याभाववत्ताविशेषणवैयर्थ्यापत्तेः हेतुतावच्छेदकसंबंधेनेति समवाया
दिसंबंधेनेत्यर्थः साध्याभाववद्वृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य न्यूनातिरिक्त
तादृशसाध्याभावस्य समवायसंबंधानुयोगिन्यवृत्तितया व्यधिकरणधर्मावच्छिन्नाभावस्यैव घटकत्वात्
हि तद्वृत्तिवनादृशसंबंधेनाप्रसिद्धेः प्रसिद्धिरिति भावः अत्र च द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ व्या
प्तिविशिष्यविशेषणसंबंधस्य परंपरया हेतुसमत्वेऽपि व्यवारणीयत्वमित्यत्र हेतुतावच्छेदकसंबंधेन किंचि
दप्यधिकरणवृत्तित्वं न सा विवक्षितं यदि च सत्तादेरव विशिष्टसत्तादिनाव्याप्यत्वं हेतुतावच्छेदकविशि
ष्टनिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणतासामान्ये तत्तत्साध्याभावसजातीयतत्तदधिकरणानु नोभयादिसंबंध ५५
योगिकसंसावत्वं तत्साध्याभाववद्वृत्तितासामान्ये तत्साध्याभावसजातीयहेतुतावच्छेदकसंबंधावच्छिन्न
त्वविशिष्टहेतुतावच्छेदकावच्छेदेन तत्ताभाववत्त्वानिवेश्य निवार्यते तदा जातिमान् सत्त्वादित्यादावुपदर्शितास राम
॥ ७४

सिद्धिनिबंधनाव्याप्तेरुक्तविवक्षामंतरेणैव निवारणसंभवात्यवधेयं। मिश्रास्तु साध्याभाववद्वृत्तित्वाभावरूपव्या
प्तेर्जातिमान् सत्त्वाद्द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिमाशंक्य साध्याभाववन्निष्ठाभावप्रतियोगित्व
वेत्र रूपव्याप्तिं साध्यस्य घटनया परिष्कृतवंतः तत्र परिष्कृते च यथाश्रुते वक्ष्यमाणदोषस्तु हेतुमत्साध्यप्रतियोगित्व
स्यवच्छेदकावच्छिन्नव्यापकतावच्छेदकतत्प्रतियोगितावच्छेदकेतररूपपारिभाषिकतत्प्रतियोगितावच्छेदके
तत्त्विय हेतुतावच्छेदकवत्त्वं निवेश्यं तस्मात्तादृशलक्षणमाहुः यद्वेति। तादृशाव्याप्तेरित्यस्य साध्याभावसाध्यता
वच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावाः प्रत्येकं ते यत्सजातीयस्य व्यापकीभूत
व्याप्यत्वे तत्त्वेनाभावस्य एकैकतत्साध्यसजातीयस्य तत्तदभावव्यापकीभूतस्य व्याप्यहेतोरभावस्य प्रतियोगितावच्छे
दकेन यद्रूपावच्छिन्नप्रतिव्यापकत्वमवच्छिन्नं प्रतियोगितावच्छेदकं हेतुतावच्छेदकावच्छिन्ननिरूपितव्यापक
तावच्छेदके तद्रूपवत्त्वं तत्त्वेन रूपेण व्याप्यत्वं वह्निमान् धूमादित्यादौ वह्नित्वावच्छिन्नवह्न्यभावसजातीयस्त
द्व्यापकीभूतो धूमत्वावच्छिन्नधूमाभावः वह्नित्वावच्छिन्नघटाभावसजातीयस्तद्व्यापकीभूतधूमत्वा
वच्छिन्नघटाभावस्तत्प्रतियोगितावच्छेदकं धूमत्वादिकमिति लक्षणसमन्वयः। व्यभिचारिणि धूमत्वा
॥ वच्छिन्नव्यापकतावच्छेदकधूमत्वावच्छिन्नघटाभावस्त्याद्यावह्नित्वावच्छिन्नवह्न्यभावसजातीयत्वेन तदभा
वव्यापकवह्नित्वावच्छिन्नघटाभाववह्नित्वावच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकवह्नित्वादेर्वह्नित्वा

गा. दी. शि.
७५

घवच्छिन्नव्यापकतावच्छेदकत्वेपि तादृशयावत्साध्याभावांतर्गतधूमत्वावच्छिन्नधूमाद्यभावसजातीयत
द्यापकाभावप्रतियोगितावच्छेदकस्यापि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वाभावान्नातिव्याप्तिः अव्यभा
भावेऽव्याप्यवृत्तित्वविशेषणात्कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य
केवलान्वयिनः सजातीयस्य व्यापकीभूत तदव्याप्यवृत्त्यभावस्याप्रसिद्ध्यापि न क्षतिः व्याप्यवृत्तित्ववि
शिष्टतदभावं प्रत्येतद्वृक्षत्वाद्यभावस्य व्यापकतासाध्यतावच्छेदकसंबंधेन साध्यव्यापकताया विव
क्षणीयतया संयोगेन द्रव्यस्याव्याप्यवृत्तितामते संयोगेन तत्साध्यकेता दृशसंबंधेन व्यापकताप्रसि
ध्या व्यापकताघटकाभावप्रतियोगिवैयधिकरण्यस्यावश्यं निवेशनीयतया साध्यवन्निष्ठप्रतियोगि
समानाधिकरणाभावप्रतियोगितावच्छेदकस्यापि संयोगत्वादेः साध्यव्यापकतावच्छेदकत्वासंभवात्तनि
तिध्येयं नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभावस्य नानाधिकरणत्वे कव्यक्तिसाध्यकेयत्किंचि
दधिकरणवृत्तित्वविशिष्टसाध्याभावस्य व्यापकीभूताभावो न हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेद
करूपावच्छिन्नप्रतियोगिताकस्तादृशसाध्याभावव्यावर्तनाय साध्यतावच्छेदकावच्छिन्नव्यापकता
वच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वनिवेशेनं व्यापकतावच्छेदकसंबंधघटिताति न समवाये
नद्रव्यत्वादिसाध्यकगुणादिहेतौ विषयतया साध्यव्यापकज्ञानादेः साध्यतावच्छेदकसंबंधावच्छिन्नाभा

राम
७५

वंप्रतिहेतुतावच्छेदकसंबंधावच्छिन्नस्य हेतुतावस्याव्यापकत्वेपि न क्षतिः साध्याभावस्य साध्यतावच्छेदकसंबं
धावच्छिन्नप्रतियोगिताकोऽप्रायः तेन संयोगादिना वह्न्यादिसाध्यकधूमादिहेतौ समवायादिसंबंधावच्छि
न्नवह्न्यभावप्रतिसंयोगादिना धूमादेरभावस्याव्यापकत्वेपि न क्षतिः अपि च रिणिसमानाधिकरणधर्मा
वच्छिन्नाभावव्यापकव्यधिकरणहेतुतावच्छेदकाद्यवच्छिन्नप्रतियोगिताकाभावमादाययातिप्रसंगवारणा
य सजातीयत्वोपादानं व्यतिरेकिसाध्यकस्थले यावत्साध्याभावसजातीयाप्रसिद्ध्या एकैकतत्सजातीयत्व
निवेशनं साजात्यघटकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वादिकमनुगतरूपेणनिरुक्तभेदकू
टस्यैव व्यापकत्वं अन्यथाय च भिन्नभिन्नसंबंधेन साध्यहेतुमावस्त्वे साध्यतावच्छेदकसंबंधावच्छिन्न
प्रतियोगिताकसाध्याभावस्य यादृशप्रतियोगितानिरूपकत्वं तस्यैव तदृत्ययास्सजातीयत्वेन तत्सजातीया
भावनिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताप्रसिद्धेः सजातीयस्यापि साध्यतावच्छेदकसंबं
धावच्छिन्नाभावस्य निवेशे हेतुव्यापकताया अपि तत्संबंधघटितताया विवक्षणे तत्काप्रसिद्धिनिबंधनदोषास
नवेपि व्यापकीभूतस्य साद्वैय्यर्थस्य दुर्वारत्वानु तद्व्यागेवरमलक्षणपर्यवसानात् अपि च रिणिसाध्य
तावच्छेदकावच्छिन्नसाध्याभावसजातीयहेतुतावच्छेदकाद्यवच्छिन्नहेत्वभावमादायातिप्रसंगस्य वारणा
य व्यापकीभूतस्येति व्यभिचारिणो भावस्य व्यभिचारनिरूपकाधिकरणे साध्याभावाव्यापकत्वाभ्युपगमः

गा· दी· शि·
७६

व्यापकत्वं च न तत्समानाधिकरणाभावाप्रतियोगित्वं सर्वस्यैव तादृशव्यक्तित्वावच्छिन्नाभावप्रतियोगितया संभवात्
न च तदधिकरणवृत्तित्वं हेतुतावच्छेदकसंबंधेनावच्छिन्नं वा अन्यथा भाववद्व्याप्यभाववति धूमसाध्याभावस्य धूमाभावनात्म
कवृत्तित्वावच्छिन्नाभावस्य संयोगादिरूपहेतुतावच्छेदकसंबंधेनावृत्त्यानन्तमालाद्यदोषावसरदुर्निवार्यं एवम्
पि यत्र स्वरूपसंबंधेन हेतुता तत्र तादृशाभावप्रतियोगितया हेतुत्वाभिमतस्य व्यापकतानुपपत्तेर्दुरुद्धरत्वात् तत्रापि
तादृशाभावप्रतियोगितानवच्छेदकरूपवत्त्वं अभावत्वाद्यात्मकतादृशरूपमादाय साध्यमात्रस्यैव व्यापकतया
व्यापकत्वस्याव्यावर्तकतापत्तेः एवं वह्न्याद्यभाववति धूमावयवादौ समवायादिना वर्तमानधूमादिरूपसाध्यसा
भावमादाय तद्व्याप्यव्यापकता संगच्छेत हेतुतावच्छेदकसंबंधेन सामानाधिकरण्यस्य निवेशनीयतया सत्ता
वान् जातेरित्यादौ सत्ताद्यभाववति सामान्यादौ हेतुतावच्छेदकसंबंधेन वृत्तेरप्रसिद्ध्या व्याप्तिर्न स्यादिति तद्भिन्नत्वान्योन्या
भावप्रतियोगितानवच्छेदकत्वमेव साध्याभावव्यापकत्वं निर्धूमो वह्निमान् स्यादित्यादौ त्वभावस्य वृत्त्यादेः प्र
त्येकं धूमादिमद्भिन्नत्वस्य प्रतियोगितावच्छेदकत्वेपि अखण्डस्य निर्धूमत्वप्रकारकप्रमाविषयत्वाद्यभावस्य तु
दृशाव्यापकतासंभवात् तत्प्रतियोगितावच्छेदकावच्छिन्नस्य हेतुव्यापकत्वमेव लक्षणसमन्वयः न चाभिन्नत्वं
भिन्नत्वविशेषणतया न चैवं अतो वह्न्याद्यभाववति धूमाद्यभाववद्धूमस्य कालिकादिसंबंधेन वृत्तावपि न क्षतिः
असाधारणाभावस्य प्रतियोगित्वरूपत्वेपि साध्यवह्नौ निरुक्त एवातो धूमाद्यभाववत्प्रयोगोलकादौ देशिकविशे

राम
७६

निरुक्त

षणतया वह्न्याद्यभाववद्वृत्तिरव्याहतैवेति न वह्न्याद्यभावस्य धूमाद्यभावव्यापकतापत्तिः अथवा अव्याप्यत्वादौ देशिक
विशेषणतासंबंधसामान्येन तत्साध्याभाववद्वृत्तित्वविशिष्टस्य नत्वनुयोगिकत्वाभावस्तदन्यत्वमेव तदभावव्यापक
त्वं अभावस्येति भाववृत्तिभिन्नस्येत्यर्थकं तेन धूमवान् जलत्वादित्यादौ जलत्वादिनिरूपिते देशिकविशेषणता
या अप्रसिद्ध्या तदवच्छेदकरूपात्मकव्यापकतासत्त्वेपि नातिव्याप्तिः असाधारणव्याप्तिसत्त्वे हेतुमत्त्वप्रकारकप्रमा
विषयत्वाद्यभावप्रतियोगितावच्छेदकावच्छिन्नव्यापकतामादायैव लक्षणसमन्वयः धूमवान् वह्नेरित्या
दौ अयोगोलकादाववृत्तिकालावच्छेदेन वर्तमानस्य वह्न्याद्यभावस्य निरुक्तव्यापकतासत्त्वादतिव्या
=
प्तिरतो व्याप्यवृत्तेरिति यद्यपि तादृशाभावोऽपि वृत्त्यादौ व्याप्यवृत्तिर्यस्तथापि व्याप्यवृत्तित्वविशिष्टस्य व्याप
कत्वोक्त्यैव लभ्यमिति अनवच्छिन्नविशेषणतासंबंधेन व्यापकतानिवेशे सत्ताभाव एव तदुक्तौ अनवच्छिन्नवृत्ति
कान्यत्वरूपं व्याप्यवृत्तित्वं तु न शक्यते निवेशयितुं संयोगेन सद्वृत्तौ हेतुतावच्छेदकसंबंधावच्छिन्नहेतुसा
मान्याभावस्य तादृशप्रतियोगितायाः प्रतियोगिताहेतुतावच्छेदकसंबंधावच्छिन्नाप्रसिद्ध्या अन्यथा व्यधिकरण
संबंधावच्छिन्नप्रतियोगिताकहेत्वभावस्य साध्याभावव्यापकस्य समनियततावैयधिकरण्यमते व्यधिकरणधर्मा
वच्छिन्नप्रतियोगिताकाभावरूपत्वमासमानाधिकरणधर्मावच्छिन्नसाध्याभावासज्जातीयत्वेन तन्नाशव्याप्ति
व्याप्तिविरहेपि आत्मत्वादिसाध्यके विषयतया हेतौ ज्ञानादौ साध्याभावव्यापकसमवायसंबंधावच्छिन्न

गा॰ टी॰ सि॰
७१

नाधसाध्याभावमादायातिव्याप्तिः। अभावे हेतुतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वविशेषणं प्रवेश्य वचनं नातिप्रसंग
वारणसंभवः समवायित्वसंबंधेन विषयितासंबंधेन वा समवायसंबंधावच्छिन्नज्ञानाधसाध्याभावस्यापि तत्समवायिविषयकत्वसंबंधेन
ज्ञानादिविशिष्टज्ञानादौ विषयितासंबंधावच्छिन्नसमवायसंबंधाभावस्य नियतसत्तेन तादृशसंबंधावच्छिन्नप्रतियोगिताकत्वात्
धूमाधभावव्यापकमहानसीयवह्न्यभावप्रतियोगिनो वह्नित्वावच्छिन्नव्यापकत्वादतिप्रसंगवृत्तिप्रतियोगिनो
व्यापकतानुपेक्षप्रतियोगितावच्छेदकस्य तदवच्छेदकपर्यंतानुधावनाद् द्रव्यविशिष्टसत्तादिसाध्याभावव्या
पकाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वादेर्हेतुतावच्छेदकोपलक्षितहेतुव्यापकतासंभवात् सप्रतीकस्तु
कालिकसंबंधावच्छिन्नप्रतीतौ व्यापकता च हेतुतावच्छेदकसंबंधेन ग्राह्या अतो महाकालभिन्नः कालत्वादित्यादौ
साध्याभावव्यापकाभावप्रतियोगितावच्छेदकस्य साध्यतावच्छेदकादेः कालिकादिसंबंधेन हेतुव्यापकताया
वच्छेदकता अवच्छेदकत्वेपि नातिप्रसंगः व्यापकताघटकसंबंधभेदनिवेशनादिकं स्वयमूह्यं। न च धूमवान् वह्निमत्त्वप्र
कारकप्रमाविषयत्वादित्यादावतिव्याप्तिः धूमाघसाध्याभावव्यापकधूमाघसाध्यप्रतियोगितावच्छेदकप्रमाकादिवृ
त्तित्वविशिष्टधूमाघभावासाध्यत्वादेः हेतुतावच्छेदकस्वरूपसंबंधघटितव्यापकतायामवच्छेदकत्वादिति वा
च्यं साध्यवृत्तिप्रतियोगितावच्छेदकव्यापकतावच्छेदकतायाः विवक्षणीयत्वात्। यथाश्रुतमिश्रलक्षणमुपन्य
स्य दूषयति। साधनस्येति। नाद्य इति। यो यः साध्याभावः प्रसिद्धः तत्तत्सजातीयतत्तद्व्यापकेत्यर्थः। तदवच्छेद राम ७१

कत्वनातद्धर्मप्रतियोगितावच्छेदकत्वं आधेयत्वं सत्त्वादित्यादावतिव्याप्तिः द्वितीये तु प्रमेयत्वादित्यादौ। ननु प्रमेयत्वादेः के
वलान्वयितावच्छेदकत्वेपि वाच्यत्वत्वादेरिव साध्याभावव्यापकव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगिता
वच्छेदकत्वमस्त्येवेत्याशंकां निरस्यति। प्रमेयत्वव्यधिकरणेति प्रमेयत्वस्य केवलान्वयित्वादिति भावः। धू
माद्यसाध्यप्रतियोगिविषयितादिसंबंधेन वह्नित्वावच्छिन्नस्य यो भावस्तस्य व्यापकता न समवायात्मकत्वेन साध्ये समवा
येन द्रव्यत्वे हेतोरात्मत्वात्मसाबंधप्रति विषयितासंबंधेन द्रव्यत्ववत् ज्ञानस्य यः समवायसंबंधावच्छिन्नप्रतियोगिता ८९
कोऽभावस्तस्य व्यापकत्वात् तन्मात्रायाप्तिप्रसंगस्य वारणाय प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकताघट
कसंबंधावच्छिन्नत्वस्य प्रवेशे निवेशनीयतया व्यधिकरणसमवायादिसंबंधेन प्रमेयत्वस्य यो भावप्रतियोगिताया
मसमानाधिकरणत्वस्याऽवच्छेदकत्वसंभवेपि न निस्तार इत्यवधेयं। अन्योन्याभाव एव व्यधिकरणधर्मावच्छि
न्नावच्छेदकताको न तत्संबंधाभावद्वयस्याश्रयेनेदं। अन्यथा घटत्वावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकस्यैतादृशा
यमात्रायत्वप्रयोगमनसेस्वात्। एतदुपलक्षणं गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे कुत्राप्यावश्यकलाघववि
न्नहेतुकाव्याप्तिरपि दुष्ट्या। एतेन व्यापकीभूताभावप्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वव्यधिकरणधर्मानवच्छि
न्नत्वोऽस्याभावविवक्षणे प्रमेयहेतुकस्थले वाच्यत्वत्वादिना घटाघसाध्यप्रतियोगितायां तादृशाभावसत्त्वेन ल
क्षणसमन्वयेपि न निस्तारः। उक्तस्थले हेतुतावच्छेदकावच्छिन्नत्वाप्रसिद्ध्या प्रतीकारादुक्तलक्षणे सजातीयादिप

गा॰टी॰शि॰
७८

दन्यस्यायोगेन लघुलक्षणमाह यद्वेति। व्याप्तिचारिणि व्यधिकरणधर्मावच्छिन्नाभावादिकमादायातिव्याप्तेर्वारणा
य साध्यवांस्तद्धूम इति। वह्निमान् धूमादित्यादौ महानसीयवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकस्य धूमत्वाद्यवच्छि
न्नव्यापकतानवच्छेदकतया अव्याप्तिरिति तन्नाह धूमाद्वृत्तिसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छि
न्नप्रतियोगिताकाद्वृत्त्यर्थः। अत्र व्याप्यवृत्तित्वविशेषणं संयोजनाभावादावुपादेयं साध्याभावसजातीयत्वा
दिविशेषणावच्छिन्नस्याव्याप्यवृत्त्यभावान्तरस्य प्रक्रान्तत्वान्नाह अपदेनापरत्व प्रमेयस्य स्फोटितिनिराकाङ्क्षताव्याभावो
दृश्येत लक्ष्मासन्निधाय साध्याभावाद्युक्तं। यावत्साध्याभावनिरूपिता न काचिदपि प्रतियोगितेति प्रत्येकपदं।
अत्र च व्याप्तिचारिणं प्रत्यपि युक्तं येन संबंधेन साध्यतावच्छेदकावच्छिन्नस्य व्यापकतया अतिप्रसंगस्य वारणा
य प्रतियोगितावच्छेदकसंबंधेन व्यापकता निवेशनीया इत्थं च समवायसंबंधावच्छिन्नवह्न्यभावप्रतियोगि
तावच्छेदकसमवायादिसंबंधेन वह्नित्वाद्यवच्छिन्नस्य धूमाद्यव्यापकत्वादसंभवः प्रतियोगितावच्छेदकसं
बंधेनैव साध्यव्यापकता विवक्षणीया। तथा च केचित्त्वन्वये साध्यतावच्छेदकसंबंधेन व्यधिकरणसंबंधावच्छिन्नसाध्या
भावमादायातिव्याप्तिर्न संभवतीति व्यधिकरणधर्मावच्छिन्नाभावस्योपयोगिता बोध्या। धूमवान् वह्नेरित्यादौ धूमा
भावप्रतियोगितावच्छेदकसंख्यादिहेतुत्वविशिष्टधूमत्वाद्यभावाभावत्वेन वह्न्यादिव्यापकत्वेऽपि नातिव्याप्तिः।
साध्यतावच्छेदकावच्छिन्ननिरूपितस्वावच्छेदकसंबंधघटितव्यापकतावच्छेदकावच्छिन्नाभावत्वः प्रतियो

राम
७८

गिता: प्रत्येकं तदवच्छेदकरूपेण तदवच्छेदकसंबंधेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमित्येतादृशार्थस्यैव विवक्षणीयत्वा
त् साध्यव्यापकतावच्छेदकेऽपि तेन व्यापकत्वविवक्षया व्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितानवच्छेदकत्वं साध्यता
वच्छेदकावच्छिन्नप्रतियोगितावच्छेदकतेन व्यापकतावच्छेदके निवेशः। यथा साधिकरणे समवायेन प्रतियोगिताश्रयः
स्वरूपसंबंधरूपत्वेन वह्नित्वाद्यवच्छिन्नप्रतियोगिताया वृत्त्यादिव्यक्तिभेदेन भिन्नाया धूमत्वाद्यवच्छिन्नव्यापकतावच्छेद
कत्वेन असंभवतीति व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताया व्यापकतावच्छेदकत्वेन निवेशितं। ॥ कूटघटितल
क्षणे व्याप्तिचारिणि साध्याभाववद्वृत्तित्वं तु न व्यापकप्रतियोगिताकोऽन्यानि धूमे वह्नित्वाद्यवच्छिन्नाभावोऽपि तु गगनत्वेनैत
सामान्याभाव एव स च व्यधिकरणधर्मावच्छिन्नाभावस्य वह्नित्वेन हृदि त्रितयातिव्याप्तिवारणाय कूटपदमुपात्तं। तादृशा
तु व्याप्तिस्थलसमानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावसाधारण्यात्त्वेन साध्याभावस्य व्यापकतावच्छेदककोटौ
प्रवेशात् एव असंभवतीति न तु विशिष्य साध्याभावनिवेशो। तथा सति निर्धूमवृत्तित्वं वह्न्यभावस्यापि तद्व्यापकतानि
वेशादिति कूटपदमनुपादाय विशिष्य साध्याभावनिवेशे सर्वलक्षणानुपपत्तिः तदुपादाने दोषाभावात् वह्नेरभावात् तादृशकूटघ
टितलक्षणवादिनमाश्रित्य कूटपदघटितलक्षणं दर्शयन्ति। परे तु इत्यादिना साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्माव
च्छिन्नाभावमादाय व्यभिचारिमात्रे अतिव्याप्तिरतो यावदन्तमिति। तथा सति समानाधिकरणधर्मावच्छिन्नस्य साध्या
भाववद्वृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावस्य यावत्त्वात् दर्शनाभावान्तर्गतस्य व्यभिचारिण्यसत्त्वान्नातिव्या

गा०टी०पं०शि०
७९

त्तिः। वृत्तिमद्वृत्तित्वानुपादाने समानाधिकरणधर्मावच्छिन्नस्य प्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभाववत्त्वं साध्या
युक्तसाध्याभावस्यासंयुक्तादौ प्रसिद्धस्य हेत्वभावत्वात् संयोगादिसंबंधेन हेत्वव्याप्तिः। यादृशसंबंधेन प्रतियोगित्वं वस्तु
मात्र एव तादात्म्यविषयितादिरूपे तादृशसंबंधेन हेतावेव परं लक्षणसमन्वयो भवितेतादृशसंबंधेनाभावत्वसंबंधेन प्रति
योगित्वं वस्तुमात्र एवेति समानाधिकरणधर्मावच्छिन्नाभावाप्रसिद्धिरिति तदुपादानं ननु वृत्तिमद्वृत्तित्वानुपादानेपि युक्ता
संयुक्तत्वावच्छिन्नाभावस्य जात्यादिरूपवृत्तिमतिवृत्तेस्तस्य वारणा संयोगादिमान् धूमादित्यादौ व्याप्तिर्दुरिव
निर्धूमे संयुक्तसाध्याभावस्य निर्धूमवृत्तित्वात् व्यापकप्रतियोगिताकतयाभावस्य निर्धूमकालादिवृत्तित्वेन च
निर्धूमवृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य वृत्तिमद्वृत्तित्वेन धूमवान् वह्नेरित्यादावति
व्याप्तिवारणाय हेतुतावच्छेदकसंबंधेन साध्याभाववद्वृत्तित्वस्यैव निवेशनीयतया यत्र संयोगादिना हेतुतत्र संयुक्त
युक्तत्वावच्छिन्नाभावस्यापि हेतुतावच्छेदकसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकत्वेन ल
क्षणघटकत्वात् वृत्तिमत्पदस्य पर्याप्तार्थकत्वे कालिकादिसंबंधेन गगनादेर्वृत्तित्वमते तेन संबंधेन यत्र हेतुता
त्रैव परमव्याप्तिवारकत्वात्तेन संबंधेन गगनवृत्तित्वाभावस्य वृत्तिमात्रे प्रसिद्धत्वादित्यत आह हेतुतावच्छेदकसंबंधेने
ति। न चातिरिति नाव्याप्तिस्थैर्यं: ननु नासंभवः तादात्म्यकालिकसंबंधेन हेतौ लक्षणासमन्वयसंभवात् वृत्तिमन्तु
नानाव्यक्तिसाध्यके तत्तत्साध्यवत्त्वसाववद्वृत्तित्वाभावस्य हेतावसत्वादव्याप्तिः। तद्घटितलक्षणद्वयाभावेपि साध्य राम ७९

तावच्छेदकसमनियतप्रतियोगिताकाभावविशेषपित्वार्थात्तद्दूषणं न सस्य तावच्छिन्नाभावमादाय वह्न्यादिसाध्यके
गुणादिवृत्तित्वविशिष्टसत्ताघटाभाववद्वृत्तित्वाभावमादाय च सत्तादिसाध्यके व्याप्तिर्दुर्वारैव। एवमव्याप्यवृत्तिकपि
संयोगादिसाध्यके तत्र घटत्वादिरूपस्य वस्तुतः एककपिसंयोगाद्यवच्छिन्नाभाववत्तया तद्वृत्तित्वव्यापकप्रतियोगि
ताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्य वृत्तिमद्वृत्तित्वेनाव्याप्तिविरहेपि तद्दृशकपिसंयोगाभावादिसाध्यक
वृत्तादिहेतौ कपिसंयोगादिरूपसाध्याभाववद्वृत्तित्वाभावस्यासत्वादव्याप्तिरित्यत आह साध्याभाववत्त्वेति। पूर्ववदिति।
अत्र लक्षणेपि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकोऽव्याप्यवृत्तिरभावो नि
पि यत्तत्सात्रापि निवेशनीयस्तस्यं:। तच्च वृत्तित्वं तस्य साध्यावच्छिन्नप्रतियोगिताकाभावानां प्रसक्तिरि
एककपिसंयोगाभावादिरूपसाध्याभावानां चावृत्तीपदविशेषणेन व्यावृत्तिः। ननु साध्याभाववद्वृत्तित्वप्रतियोगि
काभावमात्रनिवेशे प्रकृतहेतुसाधारण्यस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशेषस्य समानाधिक
रणधर्मावच्छिन्नाभावोपि वृत्तिमद्वृत्तिः संभवतीति यावत्तादृशाभावान्तर्गततद्वृत्तित्वाभावादसंभवः। एवं स
मानाधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वस्य प्रकृतहेतुवृत्तितावच्छेदकीभूततादृशधर्मावच्छिन्नस्याभावाप्रसिद्ध
त्वाद्धाभावान्तर्गत एव तत्र कालिकादपि व्यतिरेकिसाध्यकहेतूनामव्यभिचारित्वानुपपत्तिः। तत्र तत्साध्याभाववद्वृत्ति
त्वावच्छिन्नप्रतियोगिताकाभावस्य विवक्षितत्वमावश्यकः। केवलान्वयिनि साध्याभाववद्वृत्तित्वेन घटघटाभावस्य

द्वैयर्थ्यं वेत्यपमवद्वृत्तित्वम् एतद् तस्मतामावः ... भावोपविशेषणं ।

गा॰ सि॰ ल॰
८०

गादाधर्यां सद्० १६

तादृशगुरुधर्मस्य प्रतियोगितावच्छेदकत्वमते प्रसिद्धावपि तत्स्यात्तथाहि मते व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृ
त्तित्वत्वस्य स्वघटककेवलवृत्तित्वसमनियततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धेर्वारणा
याः तत्तद्भाववद्वृत्तित्वघटकधर्मावच्छिन्नाभावानिवेशे च वह्नित्वाद्यवच्छिन्नवह्न्याद्यभावव्यक्तेरेव तद्भावत्वावच्छि
न्नाभावत्वापत्तावस्तु तथा तस्य वह्न्याद्यभावस्य तादृशव्याप्तिः साध्याभाववद्वृत्तित्वत्वनिष्ठताद्रूप्यधर्मावच्छिन्नाभावानिवेशे
नैव घटवृत्तित्वत्वावच्छिन्नसाध्यैकतादात्म्येन घटत्वव्यापकादिहेतौ तादृशसाध्याभाववद्वृत्तित्वत्वनिष्ठता
दृशसाध्याभाववत्त्वरूपतयाविधधर्मावच्छिन्नाभावस्य घटादिमात्रवृत्तेरेतावता तादृशव्याप्त्यदुष्टेर्वा साध्याभावा
दिघटकताविशेषनिवेशे च प्रयासगौरवमिति तत्तत्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिकाभावविव
क्षया तीतत्तादिति स्वं प्रतियोगिता अत्र साध्याभावस्य साध्याभावत्वेन सामान्यतो निवेशे व्यभिचारिणि निर्धूमे ह
त्तित्वावच्छिन्नाभावप्रतियोगिताया व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्साध्याधिकरणवृत्तित्वसाधारणे सा
ध्याभाववद्वृत्तित्वत्वाव्यापकत्वेन नाशाभावस्य घटकतया वृत्तित्वसामान्याभावस्य तथाविधप्रतियोगिता
कस्य च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तितयाऽतिव्याप्तिरिति तत्तद्व्यक्तित्वेन साध्याभाव
तावच्छेदककोटिनिवेशात्प्रयासात्तद्वादिति । यद्यपि यत्किंचित्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकवृत्ति
मद्वृत्तियावद्भाववत्त्वं व्यभिचारिसाधारणं यावन्तः साध्याभावाः प्रत्येकं तत्तदधिकरणवृत्तित्वत्वसमनियतप्रतियोगि

एक

राम
८०

तायानानाविपक्षसाध्यके प्रसिद्धिः तत्तद्धिपक्षवृत्तित्वावच्छिन्नाभाववत्तत्तद्धिपक्षवृत्तित्वव्याप्यप्रतियोगिकस्या
प्रसिद्धेः तथापि यावतां साध्याभावानां प्रत्येकाधिकरणवृत्तित्वसमनैयत्यस्य प्रत्येकप्रतियोगितान्वयेन एतद्भाव
वृत्तित्वत्वसमनियतप्रतियोगिताकयावदभाववत्तद्भाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकयावदभाववत्तद्वृ
त्तित्वे वैर्व्यात्तिवेशसौमानुपपत्तिः एतल्लक्षणे साध्याभावसमुदायान्तसमुदायत्वेन प्रवेशः अपितु प्रतियोगिकत्वरू
पेणेति कूटघटितादिदोषः अथात्र स्वपदेन तत्तद्भावीयप्रतियोगितात्वरूपप्रतियोगितापरं साध्याभाववद्वृत्तित्वा
तिरिक्तेति तद्भावीयप्रतियोगितान्तरसत्वादिति च प्रतियोगिताव्यक्तिपरं तच्चावां तथा च यत्किंचित्प्रतियोगितानिरू
पकाभावाभावस्याव्यापकत्वयावत्यः तादृशप्रतियोगिताः प्रत्येकं तन्निरूपकाभाववत्त्वं निवेशनीयं तथा च स
मानाधिकरणधर्मावच्छिन्नजगद्वृत्तित्वसामान्याभावप्रतियोगितानिरूपकवृत्तिमद्धसाभावाप्रसिद्ध्याव्याप्तिरिति
वृत्तिमद्धसाभावीयत्वेन यावत्प्रतियोगितानिवेशनीयात्तस्यानिवेशेन तन्निरूपकाभाववृत्तिमद्वृत्तित्वविशेषणवा
वैयर्थ्यं वत्त्वविशेषणमपि तथैतिकेन नोपादीयत एव तद्विशेषणं वृत्तिमद्धसाभावीयवत्प्रतियोगिताविशेषणा
भावे च प्रतियोगिताविशेष्यीस्तत्ताभाववृत्तिमद्वृत्तित्वयावत्त्वाभिधानात् । अत्र च गुरुधर्मस्याभावप्रतियोगिता
नवच्छेदकत्वे स्वव्यापकतद्भाववद्वृत्तित्वत्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्याभावत्वकव्यापकता
घटितत्वेनाभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नान्योन्याभावस्याव्यापकत्वपुरस्कारेण न प्रतियोगिता

सा० टी० व्य०

८१

निवेशः संभवतीति तादृशावच्छेदकभेदकूटात्मकव्यापकत्वपुरस्कारेणैव तन्निवेशः । न च स्वव्यापकतत्तद्भावव‍त्तित्वत्वकूटतदभाववत्तित्वत्वौ निष्ठान्योन्याभावप्रतियोगितावच्छेदकतावच्छिन्नैकभेदो स्वपररूपो प्रतियोगितानिवेशासंभवादवच्छेदकभेदकूटनिवेशनमफलमिति वाच्यं । घटभेदादिसाध्यकस्थले तदभावव्यक्तित्वेन घटत्वादिघटिततस्य तदभाववत्तित्वत्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य स्वरूपतो घटत्वादिघटितघटवृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमपेक्ष्य गुरुशरीरतया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नैकभेदनिवेशासंभवात् । अत्र च स्वव्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तित्वत्वसमनियतप्रतियोगिताकस्य पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभावस्य पर्वताद्यवृत्तित्वे तिमहानसे धूमाभावसाधकमानवृत्तित्वेतावपि तादृशप्रतियोगिताकस्य एतल्लक्षणावच्छिन्नवृत्तित्वस्य तदन्यत्रापि वच्छिन्नवृत्तित्वोभयत्वावच्छिन्नाभावस्य एतल्लक्षणाद्यवच्छिन्नवृत्तित्वोभयत्वावच्छिन्नवर्तमानस्याभावादसंभवः । तादृशाभावव्यावर्तनाय व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वनिवेशे च गौरवं पर्वतवृत्तित्वत्वादिनानुगतवृत्तित्वसामान्याभावस्य व्यासज्यसंभवादिति अतः कल्पांतरमनुसरति । तत्र साध्याभाववत्ति अतिरिक्तानानिवेशोपि व्यधिकरणधर्मावच्छिन्नाभावमात्रस्य संग्रहात् व्यभिचारिमात्रेऽतिव्याप्तिरिति तन्निवेशनाय तथापि यथाश्रुतेनानेन महानसवृत्तित्वत्वादिना व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तित्वाभाववारणं संभवति महानसादिनिरूपि

राम

८१

तत्वविशिष्टवृत्तित्वत्वस्य साध्याभावाधिकरणनिरूपितत्वविशिष्टवृत्तित्वत्वरूपसाध्याभाववत्तित्वत्वान्यत्वविरहात् । तथापि साध्याभाववद्वृत्तित्वत्वान्निरूपितसमानाधिकरणधर्मनिरूपितावच्छेदकत्वस्य तस्यानवच्छिन्नत्वेनाविलक्षणाभेदोपः । महानसवृत्तित्वत्वादिनिरूपितावच्छेदकत्वस्य साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानिरूपितत्वात् । नैवमपि साध्याभाववन्महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणमशक्यतादृशधर्मनिरूपितावच्छेदकतायां तद्घटकसाध्याभाववद्वृत्तित्वत्वनिरूपितस्वस्याधिकवृत्तित्वस्यैनाध्याहृतत्वादिति वाच्यं । गुरुधर्मस्याभावप्रतियोगितानवच्छेदकतया महानसादिवृत्तित्वत्वसमनियतोपदर्शितगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वात् । अत्र गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्याभावपदस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावपरतया धूमवान्वह्नेरित्यादावतिव्याप्तिः धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभाववत्तित्वत्वस्य समनियतधूमत्वाद्यवच्छिन्नाभाववत्तित्वत्वापेक्षया गुरुत्वेनाभावप्रतियोगितावच्छेदकत्वविरहेणातद्वच्छिन्नाभावाप्रसिद्धेः धूमत्वाद्यवच्छिन्नाभाववत्तित्वत्वावच्छिन्नप्रतियोगिताकस्य धूमत्वावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्यानिरूपकाभावाप्रसिद्धेर्लक्षणानाक्रांतत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभाववद्वृत्तित्वाभावस्यैव लक्षणघटकत्वात् । यदि च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य तेन रूपेण न निवेशः अपितु

गा॰ दी॰ व्या॰ ८२

तद्घटत्वे दृष्टान्तश्चेनैतदादिकमाराय न तिव्याप्तिरतो न व्यक्तिनिवेश इति २

६२

तत्तत्साध्यत्वेनैव एतदेव सूचयितुं तत्तत्पदमुपात्तं । एवं च तत्तद्व्यक्तित्वेन धूमाभावघटिततद्धूमाभाववद्वृत्तित्वावच्छिन्नाभा
वस्य लक्षणघटकतया न धूमादिसाध्यके तिव्याप्तिरित्युच्यते तथापि घटभिन्नं प्रमेयत्वादित्यादावतिव्याप्तिः तत्
त्तद्व्यक्तित्वेन रूपेण घटस्य तदभावघटिततद्व्यक्तिमद्वृत्तित्वाप्रसिद्ध्या लघीयस्त्वात् समनियतस्य किंचिद्विशेषणानव
च्छिन्न घटत्वघटितस्य घटवद्वृत्तित्वस्यैवाभावप्रतियोगितावच्छेदकतया तद्व्यक्तिमद्वृत्तित्वावच्छिन्नाभावा
प्रसिद्धेः घटवद्वृत्तित्वावच्छिन्नप्रतियोगितायाः साध्याभाववद्वृत्तित्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरू
पकाभावस्य लक्षणघटकत्वासंभवात् अधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वावच्छिन्नाभावस्यैव तथा
त्वात् यदि चाभावधर्मो विशेषणविधया न निवेश्यते अपितु अभावप्रतियोगिनि अभावे तु साध्यतावच्छेदकावच्छि
न्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुपलक्षणविधया निवेश्यते तत्रापि एवं तत्तल्लक्षणपादान
मपि न तत्तद्व्यक्तित्वेनाभावनिवेशस्य आवश्यकत्वं उपलक्षणीभूतप्रतियोगिताविशेषणेन अभावान्तरव्यावृत्तेः सं
भवेत् तत्तद्व्यक्तित्वस्य प्रतियोगितावच्छेदकतया तस्य निवेशप्रयोजनविरहात् । एवं च घटवद्वृत्तित्वावच्छिन्ना
भावो धूमलक्षणघटको घटत्वसमभावस्य घटत्वस्य तत्प्रतियोगितावच्छेदकघटकत्वात् प्रतियोगितावि
शेषोपलक्षिताभाववद्वृत्तित्वपर्याप्तनिरूपकताकान्यत्वपर्यन्तनिवेशात् धूमादिसाध्यकस्थले न विधूमद्वृ
त्तित्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकशरीरे अभावविशेषणस्याधिकस्य निवेशापि न क्षतिः । न चा

स्योपलक्षणतया ३

राम ८२

सार्वप्रतियोगिकोपदेऽपलक्षणतया भानस्यानुभवविरुद्धत्वाद्विशिष्टनिरूपितत्वाभावरूपस्य निरूपितत्वसंबं
धावच्छिन्नविशिष्टाभावरूपस्य वा विशिष्टनिरूपितस्य प्रतियोगिकोक्तप्रतियोगिताविशेषस्य कथमुपल
क्षणविधया निवेशः इति वाच्यं प्रतियोगितासंसर्गकज्ञानस्य तादृशाभावस्य तथात्वात् अन्यावच्छिन्नप्रतियो
गिताकोऽभावप्रत्यायाकारकस्य स्वरूपतो घटत्वावच्छिन्नप्रतियोगिताकाभावभानस्य सर्वसंमतत्वात् प्र
कृते च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको यो अभावस्तद्वृत्तित्वप्रति
योगिकाभाववतः समानाधिकरणधर्मावच्छेद्यत्वस्य यो अभावस्तत्प्रतियोगिताका यावन्तो अभावास्तद्वान् हेतुरि
त्याकारक व्याप्तिग्रहे प्रतियोगितायां विशेषणत्वेनानुपपत्त्यभावात् । अत एव च व्यापकतावच्छेदकत्वादेरपु
पलक्षणविधया भानोपपत्तिः । न च तादृशज्ञाननिरूपितत्वप्रतियोगिकस्य तत्त्वावच्छिन्नप्रतियोगिताकस्य वाऽभावस्य
निवेशे निर्धूमवृत्तित्वावच्छिन्नाभावप्रतियोगितानिष्ठावच्छेदकतायामपि किंचिद्विशिष्टताद्यज्ञाननिरूपितत्वा
वच्छिन्नाभावसत्त्वात् अभावस्य प्रतिवाच्यं तत्र तद्वद्वृत्तित्वनिरूपितत्वपर्याप्तप्रतियोगिताव
च्छेदकताकाभावस्यैव निवेशनीयत्वात् एवं तत्तद्व्यक्तित्वेनाभावनिवेशो व्यर्थ इत्यतस्तत्पदोपादानमपि सा
र्थकं तत्पदापि घटत्वसत्त्वादिसाध्यके व्यभिचारिण्यतिव्याप्तिवारणाय कथं निर्विशेषणकघट
त्वादिवृत्तित्वस्यैव तत्र घटत्वादिवृत्तित्वाभावप्रतियोगितावच्छेदकतया घटत्वत्वादिरूपसाध्याभावस्य प्रति

गा॰ दी॰ शि॰
८७

योगितावच्छेदकशरीरे निवेशे न व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकतया न जातेः समवा
येनैव स्वरूपतोऽवच्छेदकत्वं न तु संबंधांतरेण अत एव गोत्वादिजातिनिष्ठव्याप्यपदविशेषप्रवृत्तिनिमित्त
त्वगवेतरासमवेतत्वादेरवच्छेदकत्वं स्वीकुर्वतीति न च तादात्म्यसंबंधेन घटपोरपि गोत्वादिजातेरिति निर्विशेष
णघटत्वादिघटितस्याभावप्रतियोगितावच्छेदकत्वं न संभवतीति वाच्यं तादृशनियमे मानाभावात् घ
टाभावाभावस्योपलक्षणतया रुचीक्रियते तदा महानसवृत्तित्वलाघवच्छिन्नाभाववारणमशक्यमेव यदि
च साध्याभावातिरिक्तविशेषणाविशेषिताधिकरणवृत्तित्वलाघवच्छेदकताभिन्नसमानाधिकरणधर्माव
च्छेद्यताभावे निवेश्य विशेषितघटत्वादिवृत्तित्वाभावः संगृह्यते तदा तादृशाभावमादाय जातिसाधारण
स्यैतावव्याप्तिर्वज्रलेपायितेति ॥ अत्र वदंति गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमतेनेदमभिहितं
व्यधिकरणधर्मावच्छिन्नसाध्याभाववन्महानसवृत्तित्वलाघवच्छिन्नाभाववारणाय च साध्याभाववद्वृत्तित्वप
र्याप्त्यवच्छेदकताभिन्नसमानाधिकरणधर्मानवच्छेदकतानिरूपकत्वमेव प्रतियोगितायां विशेषणं देयं
न चैवं घटत्वादिना साध्याभाववद्वृत्तित्वाभावस्य ग्रहणं एकसमानाधिकरणपदोपादाने विफलं यदि वैयर्थ्य
विफलत्वात् घटाभावस्याग्रहेऽपि केवलान्वयिसाध्यकसाध्याभाववद्वृत्तित्वेन घटाघटाभावमादाय लक्षण
संभवादिति वाच्यं विषयितादिसंबंधेन यत्र हेतुता तत्र हेतुतावच्छेदकसंबंधेन साध्याभाववतिरक्तेः साध्या

राम
८७

तावच्छिन्न ४

भाववद्विषयतादिरूपाया विषयताद्विस्वरूपत्वेन साध्याभाववद्विषयतात्वादिरूपसाध्याभाववद्वृत्तित्वस्य के
वलान्वयितया तदवच्छिन्नाभावाप्रसिद्ध्या तादृशाभावघटितलक्षणानुपपत्तेः न च साध्याभाववद्विषयतात्वा
दिकं येन संबंधेनावृत्ति तेन संबंधेन तदवच्छिन्नाभावमादाय लक्षणसमन्वयः संभवतीति वाच्यं कालिक
संबंधेन साध्याभाववद्वृत्तित्वस्य यावत्तस्य ध्वंसाधिकरणवृत्तित्वात् प्रकृतेः स्वरूपसंबंधावच्छिन्नप्रति
योगितावच्छेदकताकाभावस्य वक्तव्यत्वात् व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकाभावस्य लक्ष
णघटकत्वासंभवात् विषयतायाः आत्मादिरूपत्वेऽपि विषयतात्वविशिष्टस्य न समवायादिना वृत्तित्वाद्
स्वरूपसंबंधेनाभावात् समवायाभावात् किंतु स्वरूपसंबंधेनैवात एव समवायादिसंबंधावच्छिन्नप्र
तियोगिताक एव विषयतात्वावच्छिन्नाभावो लक्षणघटको भविष्यतीत्यपि न कालिकेनोपातिरिक्तस्य नोक्ता
लिकविषयतादिसंबंधावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वावच्छिन्नाभावस्यासत्त्वेन स्वरूपसं
बंधावच्छिन्नप्रतियोगिताकाभावस्यैव निवेशनीयत्वात् न चैवं साध्याभाववद्वृत्तित्वातिरिक्तसमानाधिक
रणधर्मानवच्छिन्नस्यापि तत्राप्रसिद्धिः घटत्वादेः साध्याभाववद्विषयतानिष्ठप्रतियोगितावैयधिकरण्या
संभवादिति वाच्यं घटत्वादिना घटाघटाभावस्यैव तत्र लाभात् अथैवमपि सामानाधिकरण्यमनुपूर्वं साध्या
भाववद्वृत्तित्वनिष्ठत्वेन धर्मविशेषणकत्वे घटत्वादेः घटादिस्वरूपसाध्याभाववद्विषयतानिष्ठत्वेन गगना

गा॰ टी॰ शि॰
८४

देशपरित्वनिष्ठविषयतात्मकत्वेनसाध्याभाववद्वृत्तिपतानिष्ठतयासाध्याभाववद्वृत्तित्वातिरिक्तवृत्तित्वव्याप्य
र्मनवच्छिन्नाभावाप्रसिद्ध्या उक्तस्थले व्याप्तिदुर्वारैवयेनरूपेणयत्साध्याभाववद्वृत्तित्ववृत्तितद्रूपावच्छि
तद्वनवच्छिन्नप्रतियोगिताकाभावविवक्षणेनगगनत्वविशिष्टगगन[illegible]त्वाद्यवच्छिन्नाभावस्थले लक्षणघ
टकतानिर्वाहः हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वव्यक्तेः किंचिद्विशेषितत्वावच्छिन्ना
वच्छिन्नप्रतियोगिताकाभावस्यतथाविधहेतावसत्वादसंभवप्रसंगइति येन येनसंबंधेनयद्वृत्तितेनसं
बंधेनतन्निष्ठावच्छेदकताकान्यत्वस्यतद्वनवच्छिन्नत्वस्यविवक्षणीयतयासंयोगादिसंबंधेनघटत्वाद्यव
च्छिन्नप्रतियोगिताकाभावमादायोक्तस्थले लक्षणसमन्वयसंभवात् उक्तावच्छेदकासाधेनचसाध्याभाव
वद्वृत्तित्ववृत्तिश्रेयादानं नतु तद्घटितलक्षणघटकौप्रयोजनाभावात् सर्वत्रदर्शिताभावमादायैवलक्षणसम
न्वयसंभवेनसमवायादिसंबंधेनघटत्वाद्यवच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभावस्थले लक्षणघटकता
विरहातिविरहात् एतेनधर्मत्वत्वाद्यवच्छिन्नधर्मत्वाद्यभावस्यसाध्याभाववद्वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रति
योगिताकस्य वारणाय साध्याभाववद्वृत्तित्वप्रतियोगिकत्वविशेषणमप्यनादेयं अतएवसमानाधिकरण्य
स्यप्रतियोगितावच्छेदकत्वापेक्षयालाघवमेवेतत्कल्पानुसरणबीजमत्रानिष्ठुरत्वमिति यदि चयुक्त
वच्छेदक मिनाभावप्रतियोगितावच्छेदकत्वदामहानसवृत्तित्वलाघवच्छिन्नाभाववारणाय साध्याभाववद्वृत्तित्वातिरि

राम
८४

वद्य [illegible] योर्द्धं
तेनसाध्याभाववृत्तित्ववृत्तित्वघटकतानिर्वाहः ८ तेन
घ. ल

केवलेनसाध्याभाववद्वृत्तित्वत्वाघटकत्वेनैवविवक्षणीयं तद्धर्मस्वरूपाविषयकप्रतीतिविषयसाध्याभाववद्वृत्ति
तात्वरूपविशिष्टनिरूपितविषयताकत्वे एकवस्तुद्वयवृत्तित्वावच्छिन्नप्रत्तरसामोपितलक्षणघटकप्रतिवृत्तिमद्वृत्तित्व
ल दसाध्यंत्वं स्वाविषयकत्वं वह्नितरविशेष्यतानापन्नस्वविषयिताप्रत्यत्वे अतोविशेष्यविधयासाध्याभाव
वद्वृत्तित्वघटकसाध्याभावादेस्तत्घटकत्वनिर्वाहः इतिपूर्वोक्तदोषानवकाशः चरमोपादविशेषितात्मतरविशेष्यता
तानापन्नत्वनिरूपितत्वव्याख्या तेनवृत्तित्वादिविशेषणकज्ञानेसाध्याभाववद्वृत्तित्वादेर्विशेष्यतयाविषयत्वे
पिवृत्तित्वादेर्नसाध्याभाववद्वृत्तित्वत्वाघटकत्वं नच साध्याभाववद्वृत्तित्वघटकधर्मपर्याप्तप्रतियोगि
तावच्छेदकताकाभावानिवेशेतत्वाघटकतातद्धर्मस्वरूपाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वरूपविशिष्ट
निरूपितविषयिताकत्वेनैतत्स्वाविषयकप्रतीत्याविषयताव्याविशिष्टकत्वं तत्तद्भाववद्वृत्तित्वविषयकप्रतीतौ
केवलाधेयतात्वस्याविषयतयातद्भाववन्निरूपितत्वविशिष्टाधेयतात्वेतद्विषयकप्रतीत्यविषयत्वस्यदुर्घटत्व
यातद्भाववद्वृत्तित्वत्वादेस्तद्घटकत्वानिर्वाहात् केवलाधेयतात्वस्यचतद्घटकतया व्याप्तिमद्वृत्तित्वेतेनरूपेणाघट
घसावमादाय पूर्वं व्याप्यपत्वेरिति वाच्यं तथासति उक्तरीत्याविषयितासंबंधेनयत्रेवृत्तितत्वानवत्व[illegible]साध्याभावप्रसि
द्धेः घटत्वमितिमेयत्वादित्यादौ निर्विशेषणकघटत्वादिवृत्तित्वस्यव्याससमानाधिकरणधर्मावच्छिन्नाभाववद् त्व
त्तित्वाघटकत्वेनयावायेयत्वादित्यादावपिताद्रूप्यस्वाविषयकप्रतीत्यवृत्तिव्यधिकरणधर्मावच्छिन्नसाध्या

[illegible]

गा-टी-शि-
८५

भावविशेषितघटत्वादिघटिततदभाववद्वृत्तित्वरूपविशिष्टनिरूपितविषयिताकत्वात्तदभाववद्वृत्तित्वघटक
तयावृत्तित्वं हि तत्तद्वच्छिन्नाभावस्य हेतावसत्त्वेनाव्याप्त्यापत्तेः तत्तदभाववद्वृत्तित्वत्वाघटकधर्मानवच्छिन्ना
भावनिवेशेनैव वारणसंभवाच्चानाहुः अधर्मेण निरुक्तसाध्याभाववद्वृत्तित्वत्वघटकत्वसत्त्वेपि स्वाविषयकप्रती
तिवृत्तिसाध्याभाववद्वृत्त्यन्तरवृत्तित्वविषयिताकत्वेन साध्याभाववद्वृत्तित्वत्वाघटकत्वस्यापि सत्त्वेन तदवच्छिन्नाभा
वस्य यथा निरुक्ताभावाप्रसिद्धकत्वात् न वस्वाविषयकप्रतीत्यवृत्तितदभाववद्वृत्तित्वत्वनिरूपितविषयिताशाला
त्मकत्वरूपतत्तदभाववद्वृत्तित्वघटकघटकताविशेषानिविशेषणकघटत्वादिवृत्तित्वत्वस्य साध्याभाववद्वृत्ति
त्वघटकत्वाप्रसत्वात् तदघटकधर्मावच्छिन्नाभावानिवेशोपि संभवतीति वाच्यं तथा सति व्यापकताघटितसा
मान्यपदार्थनिवेशेनैतदघटकधर्मानवच्छिन्नाभावनिवेशापेक्षया गौरवात् समानाधिकरणपदसा
र्थक्यं तु उक्तरीत्यैवेति ध्येयं। केचित्तु अधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन पर्वतवृत्तित्वघटान्यत
राघसाविवारणाय एतन्मतेपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वप्रतियोगिता विशेषणाभावस्य कोत
था च साध्याभाववद्वृत्तित्वेन घटाभावस्य लक्षणाघटकतानसंभवतीति निषेधद्वयनिवेशेन समानाधिकर
णपदोपादानपोर्थक्यं तेत्याहुः। प्रतियोगिताद्यंसाध्याभाववद्वृत्तित्वव्याप्यत्वनिवेशप्रयोजनमाह। आलो
काघवृत्तित्वेनेति। वह्निसामान्याभाववद्वृत्तित्वस्य यो भाववत्त्वं धूमादावसत्त्वेपीत्यन्वयः। वह्निसामान्याभावः राम ८५

भावनकल्पनुमानासिद्धनयातधाविनापीनु म श्वकपदत्वा ५

[illegible]

[illegible]

वह्निसामान्याभावः साध्याभाववद्वृत्तित्वत्वव्यापकतानिवेशनप्रयोजनमाह। यत्रैवेति। इंधनत्वावच्छिन्नेतिसा
ध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया इंधनत्वावच्छि
न्नघटाभावापलक्षणं महानसवृत्तित्वादेरप्राप्तौ च मुख्यत्वमहानसवृत्तित्वादिनेति बोध्यं। तादृशाभावाधिकरणम
हानसवृत्तित्वत्वावच्छिन्नस्येति रामरुद्रीये [illegible] गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेपि तादृशाभावा
विशेषितमहानसवृत्तित्वत्वावच्छिन्नाभावमादायदोषप्रसक्तेस्तद्विशेषितमहानसवृत्तित्वत्वावच्छिन्नाभावस्य
र्यतानुसरणे संसर्गविरोधीति वाच्यं अधिकरणतस्यापलक्षणतयाशेषांशस्य विशेषणता तस्याविवक्षणेनानुप
पत्त्यभावात्। अधिकरणविशेषानुपरक्त इति रेसाभावमादायापि दोषं दर्शयति [illegible] निष्ठेति धूमादिनिष्ठसाध्या
भाववद्वृत्तित्वत्वाप्रकिं तावच्छिन्नाभावस्येत्यर्थः। हेतुतावत्ते: आलोकादिहेतौ: एतेन हेतिमद्वृत्तित्वमसत्त्वे
निरुक्तचिंतां स्वव्यभिचारं धूमादौ। अत्र लक्षणेसत्ताभाववान् द्रव्यत्वादित्यादौ सत्ताभावस्य साध्यभावस्याधिक
रणधर्मावच्छिन्नप्रतियोगिताकस्यैव समवेतवृत्तित्वेपि द्रव्यवृत्तित्वावच्छिन्नाभावस्यापि साध्यतावच्छेदकाव
च्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि
तद्वृत्तसमवेतत्वाभावस्य समवेतगुणत्वादिवृत्तित्वात् द्रव्यत्वादेस्तद्वृत्ताभावाभावादितिव्याप्तिः। एवमन्यत्रापि साध्यकरूढ
त्वेपि साध्यतावच्छेदकावच्छिन्नव्यापकताप्रसिद्ध्यानातिव्याप्तिः। कूटघटितलक्षणे चतत्रतत्रातिव्याप्तिवारणा

गा॰ व्या॰ टी॰
८६

यत्साध्यसमानाधिकरणत्वे सतीति विशेषणं देयं एतल्लक्षणे चाद्यन्तिमहेतुकेति व्याप्तिवारणाय वृत्तिमत्त्वमात्रमुपादेयं
कूटघटितलक्षणवद्व्याप्यत्वमाहाकांक्षान्योन्याभावेत्यादिना आधेयव्याप्तिर्द्वैर्व्याकिंतु तदन्यदोषाणामेवाज्ञानवकाशत्वं
बोध्यं ॥ ॥अन्ये त्विति। घटसादिनानिर्धूमवृत्तित्वाघ साधनसाध्यव्याप्ति चारिण्यतिव्याप्तिवारणाय यावत्तोपा
दानं एवं च केवलान्वयिनः साध्यस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिकस्यैवासावस्याप्रसिद्ध्या तत्समुदायाधि
करण अगद्धृत्तित्वस्याप्रसिद्धेः समानाधिकरणधर्मावच्छिन्नाभावोपि पावद्रसावांतर्गतं तद्विलक्षणद्विर
हाताद्धसाध्यके विषयताघातिरिक्तसंबंधेन तावव्याप्तिः साधनसमानाधिकरत्वेन साध्याभावविशेष
णपक्षे चव्यतिरेकि साध्यस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैवासावस्य सद्भावलक्षणघटक
तयाऽजगत एवं तत्कूटाधिकरणतयाव्यतिरेकिसाध्यके पिविषयताऽतिरिक्तसंबंधेन तावव्याप्तिरिति
वृत्तिमद्धृत्तित्वमसावविशेषणं तावदयुक्ततत्त्वमिति साध्याभावसमुदायाधिकरणवृत्तित्वस्यैवः प्रयोज
नं चेति सर्वदलप्रयोजनं आलोकाघवृत्तित्वेन निर्वाहवृत्तित्वाभावमादायवह्निमान्धूमादित्यत्राव्याप्तिवा
रणस्य पंचकलक्षणोक्तमेव। चरमदलप्रयोजनं तु साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वे
केवलान्वयिसाध्यके ज्ञेयत्वादिहेतौ घटादिवृत्तित्वाभावमादायाव्याप्तिवारणमेव न तु वह्निमान्धूमादित्यत्रम
हानसवृत्तित्वाघसावव्यावर्तनं तत्र महानसादेर्वृत्तिताघवच्छिन्नवृत्तिसामानाधिकरण्येन साध्याभावघटक नम

राम
८६

रणत्वात् एतस्य च प्रागनुक्तत्वात् उक्तमापमिति। समुदायपदप्रयोजनमाह। साध्याभावाधिकरणे
ति। व्यधिकरणधर्मावच्छिन्नाभावस्यैवालि निर्धूमवृत्तितत्वाघवच्छिन्ननिर्धूमवृत्तित्वाभावस्यप्रतियोगितायाः
व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणमहानसादिवृत्तित्वाद्वा तत्र यासाध्याभावाधिकरणवृत्तित्वा
व्यापकतयाऽजगद्धृत्तित्वसामान्याभावस्यैव तद्व्यापकप्रतियोगिताकत्वात् तस्य च समानाधिकरणधर्मावच्छिन्न
प्रतियोगिताकस्याद्य साधव्यसिद्धत्वादिति भावः। व्याप्तिं चारिण्यतिव्याप्तिरिति। हादस्यस्य जगद्वृत्तित्वाभावस्य
सर्वत्रैवसत्त्वादिति भावः। अन्न च स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वलक्षकत्वे सतिसाध्याभावसमु
दायाधिकरणवृत्तित्वत्वव्यापकत्वे प्रतियोगितावि शेषणं न च चाविशेष्यदलेसमुदायानिवेशेपि निर्धूमवृत्तित्व
त्वाघवच्छिन्नाभावस्यैवासाघटकत्वेऽपि नातिव्याप्तिः संभवति। व्यतिरेकिसाध्यके तादृशप्रतियोगिताया अप्रसि
द्धेः जगद्वृत्तित्वसामान्याभावीयप्रतियोगितायाः साध्याभावाधिकरणवृत्तित्वत्वव्यापकत्वेपि स्वव्यापकसा
ध्याभावसमुदायाधिकरणवृत्तित्वत्वलक्षकत्वरूपस्वेदलविरहात् धूमाद्यभावसमुदायाधिकरणवृत्तित्वत्वस्य
महानसादिवृत्तित्वेपि तादृशप्रतियोगितासत्त्वात् पूर्वतिस्वेच पत्रये विशेषदलेसमुदायपदसार्थक्येप्येवं द्वके मे
नोपादेयं तद्वदुपादानेपि वह्निमान्धूमादित्यादावालोकाघवृत्तित्वावच्छिन्नाभावप्रतियोगितुस्यालोकादिमि
द्धपर्वतादिवृत्तित्वसाधारणसाध्याभावाधिकरणवृत्तित्वत्वाव्यापकतयाताद्दशाभावमादायदोषाप्रसक्तेः। ॥

विशेष्यदलेऽपि व्यधि
करणधर्मावच्छिन्नाभाव
घ्ना(?)

प्रतियोगितत्वे

उपादाने व्यतिरेकिसाध्यकमात्र एव उक्तरीत्या तादृशप्रतियोगित्वाप्रसिद्ध्याव्याप्तिप्रसंगात् तत्तथा च घटत्वा
देरित्यादौ घटत्वेन जगद्वृत्तित्वाभावमादाय योगिनि व्याप्तिरित्याशयेन दीधितिकृता तदभिहितं अतिव्याप्तिवारणा
यतोपदत्वे समुदायप्रवेशनेन च निर्वाह्य इति तत्त्वव्यापकप्रतियोगिताकस्यालोकावृत्तित्वावच्छिन्नाभावस्य
वह्निमान् धूमादित्यत्र स्वेदत्व[illegible]कान्ततया पर्वते लोपादानमावश्यकं तत्र समुदायाप्रवेशे व्यधिकरणधर्माव
च्छिन्नसाध्याभावाधिकरणवृत्तित्वत्वव्याप्यप्रतियोगिताकस्यालोकावृत्तित्वाभावस्य प्रमेयं सत्वादव्या
प्तिरिति तत्रापि तत्प्रवेशनमिति केचित्समादधति ॥ परंतु प्रतियोगित्वव्यापकताविशेष्यतापन्नमेव साध्याभा
वसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वविशेषणविधया निवेश्यं न त्वलुतद्रुलस्यो करीत्यादिध्यानिवेशः। एवं
च स्वरूपसंबन्धेनानवच्छिन्नत्वगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वप्रतियोगित्वव्यापकत्वविशेषि
तसाध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वेनाभावप्रति
योगितावच्छेदकमिति तादृशप्रतियोगितावच्छेदकसत्त्वावच्छिन्नाभावरूपव्यापकतानिवेशात् सर्वोच्चदलस्याभि
धानिवेशनमावश्यकमिति वाच्यं व्यापकतांतस्योपलक्षणविधया साध्याभावसमुदायाधिकरणवृत्तित्वत्व
रूपव्याप्यांशनिवेशस्य सर्वात्मव्यापकतावच्छेदकावच्छिन्नाभावत्वादिज्ञाने व्यापकतांशस्य वोक्तावच्छेद
कत्वावच्छिन्नाभावस्य व्यापकताया उपलक्षणतया ज्ञाने विरोधात् । वस्तुतस्तु गुरुधर्मस्याभावप्रतियो

राम
८१

गितानवच्छेदकत्वे साध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वम
पि नाभावप्रतियोगितावच्छेदकं वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगिता
वच्छेदकत्वत्वादिरूपसमानियतधर्मापेक्षया व्यधिकरणधर्मावच्छिन्नसाध्याभावेनाघटितस्य गुरुत्वादि
तितादृशधर्मावच्छिन्नाभावो निवेशयितुमशक्यः किंतु तादृशान्योन्याभावप्रतियोगितावच्छेदकं यत्तद्रूपकूट
मेव निवेशनीयं एवं च प्रतियोगिताव्यापकत्वघटितोक्तधर्मस्य प्रतियोगितानवच्छेदकत्वमकिंचित्करमेवेत्याहुः।
तेनेति समवायेन वह्नेः साध्यत्वे पर्वतस्य संबंधत्वावच्छिन्नवह्न्यभाववद्यानधिकरणत्वेपि धूमेनातिव्याप्तिः। सं
योगेन वह्नेः सत्त्वात् तेनैव धूमवत्पर्वतस्य तादृशाभाववद्यानधिकरणत्वेपि [illegible]वृत्तित्वेनातिव्याप्तिः समवायेन व
ह्नेः साध्यत्वे संयोगेन तस्य तेन च पर्वतस्य धूमवत्पर्वतस्य तादृशाभाववद्यानधिकरणत्वेपि पर्वतवृत्तित्वस्य धूमे
नातिव्याप्तिरिति प्रयोजनाभासं संबंधत्वावच्छिन्नप्रतियोगिकाभावद्वयं संयोगसंबंधावच्छिन्नवह्न्यभावसमवायसंबंधाव
च्छिन्नवह्न्यभावद्वयं साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वानिवेशनेन तादृशाभाववद्यानधिकरणस्य
पर्वतादेः साध्याभाववद्धिकरणतया तदधिकरणवृत्तित्वाभावात् [illegible] तेनातिव्याप्तिः
स्यादिति भावः। न च साध्यतावच्छेदकसंबंधावच्छिन्नाभावनिवेशनेपि समवायेन वह्नेः साध्ये संयोगेन [illegible] धूमे
नातिव्याप्तिवारणं किंतु शक्यं तत्समवायसंबंधावच्छिन्नवह्न्यभाववद्धधिकरणसंयुक्तत्वस्य व्यधिकरणधर्मावच्छि

ग॰ दी॰ टि॰
९८

त्वं पूर्ववयमानसंयुक्तपदार्था प्रतीति ॥

भावाकस्यैव संयुक्तवृत्तितात्तेनु कता अस्यैव तादृशाभावकूटाधिकरणगगनसंयुक्तवादितिकथमव्याप्तिः सदृत्तिं समवायेन ध्वंसहेतुकस्थलपरतातुत्तनुत्यातेसमवायेनु ध्वंसवतः साध्याभावकूटाधिकरणत्वानिराकरणादितिवाच्यं। संयुक्तभावस्य गगनादिसंयुक्तत्वेपि तस्य संयोगस्य वृत्तत्वानियामकतया संयोगेनवृत्तिकत्वत्व वृत्तिनियामकतासत्त्यादिसंबंधेनवृत्तित्वस्वीकारे वृत्तिपदस्यसंबंधपरत्वमावश्यकमित्यभिप्रायेणैतदुक्ते स्याद्दितीयरूपानुसरणं। साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वपक्षे समवायादिसंबंधावच्छिन्नवृत्तिभावस्य वृत्तित्वस्वरूपसाधनसामानाधिकरण्याभावेननत्वातिव्याप्तिसंभवः। एवं सत्ताभावद्रव्यत्वादित्याभावातिव्याप्तिवारणाय साध्यसामानाधिकरण्येसतीतिविशेषणप्रवेशस्यावश्यकतया संयोगादिनावृत्तिमत्त्वसत्त्वान्वृत्तित्वघटत्वादौ तेनाप्यतिव्याप्तिर्वारयितुं शक्यत इत्यतः पर्वतवृत्तित्वघटत्वसंयोगेहेतुकाद्वसरणं। संयोगेन द्रव्यत्वाव्याप्य इतितापक्षे पर्वतस्य संबंधवृत्त्यावच्छिन्नवृत्तिसावद्धाधिकरणत्वेपि न तस्य व्याप्यत्तिनुविशिष्टसाध्याभावकूटाधिकरणत्वं विवक्षणीयं चावश्यंतादृशसाध्याभावकूटवत्तो अन्यथा अव्याप्यवृत्तिसंयोगादिसाध्यकेवलिगौरविजगत एतत्साध्याभावकूटाधिकरणत्वेनातिव्याप्तिरितिदर्शितत्वात्। पर्व तद्वृत्तित्वेपितादृशाभावकूटाधिकरणवृत्तित्वाभावोक्षतएवेत्यतिव्याप्तिप्रसंगः। पूर्ववदत्र साध्याभावपदेनसाध्य

यसमद्व्यस्य वृत्तवयवत्वाधिकरणत्वाभ्यपयः प्रामाणिकं नलक्षण त्रसंयोगगगनादिदितिवापसिद्धा ॥

नाम
९८

तावच्छेदकविशिष्टव्यापकतावच्छेदकावच्छिन्नाभावविवक्षणेनानाविपक्षकेन्याविधतत्वाद्विपक्षादत्वात्तावच्छिन्नाभावकूटाधिकरणाप्रसिद्धा व्याप्तिः साध्यतावच्छेदकविशिष्टसमव्यापकतावच्छेदकावच्छिन्नाभावानिवेशेनेगौरवमितिसाध्यतावच्छेदकसमव्याप्तप्रतियोगिताकाभाव इति विवक्षितमुक्तिःताप्णतायदहनत्वादिरत्तावच्छिन्नप्रतियोगिताकत्वानांतथाविधसाध्याभावत्वामधिकरणेध्वंसादेरितावपिवह्नित्वावच्छिन्नवह्न्यभावघटितत्वात्तादृशाभावकूटवत्त्वरत्नेरव्याप्यनवकाशादित्याशयेनतथाविधमेवाभावंनिवेशयति तन्नयोर्तिः स्वप्रतियोगितासमनियताभावत्वंसाध्याभावप्रतियोगितायाः साध्याभावसमनियताभावप्रतियोगिपर्यंतिरइतित्वेपि साध्यतावच्छेदकेव्याधिकरणेनधर्मेणावच्छिन्नायाः साध्यमात्रवृत्तिप्रतियोगितायाः साध्यतावच्छेदकसमनियतत्वमक्षतमेव। अत्र घटत्वावच्छिन्नाभावात्वनिष्ठप्रतियोगितायट्त्वाघवच्छिन्नवह्न्यादिनिष्ठप्रतियोगितायाश्चमिथतेषु त्वनिष्ठप्रतियोगितांतरकल्पनेगौरवादितितादृशप्रतियोगितायामवाच्यत्वादिरूपसाध्यतावच्छेदकसमनैयत्यमितिचेन्न वाच्यत्वाधिकरणवाच्यत्वमित्यादौ सत्तावच्छिन्नाभावप्रतियोगितायाः वाच्यत्वमिन्नवृत्तित्वस्यासंभावितत्वात्। वस्तुतस्तु घटत्वावच्छिन्नवाच्यत्वाभावप्रतियोगितायाःव्यधिकरणघटत्वादेरिवसमानाधिकरणवाच्यत्वादेरपि अवच्छेदकत्वमावश्यकं। घटत्वेनवाच्यत्वेनास्तीत्यादिप्रतीतिसावाच्यत्वादेः प्रतियोगितावच्छेदकत्वानवगाहितत्वादस्प्रतीतेर्वा चत

वहृतिनिरवालेनावाली
८

गा॰टी॰ द्वि॰
८९

त्वादिविशिष्टवैशिष्ट्यानवगाहित्वेन तत्र वाच्यत्वादिप्रकारकज्ञानानपेक्षायत्वेः। एवं च घटत्वेन प्रमेयत्वं नास्ती
त्यादिप्रतीतिविषयप्रतियोगितायाः अतिरिक्तत्वमावश्यकं अवच्छेदकभेदादिति घटत्वेन वाच्यत्वं नास्तीत्यादिप्र
तीतिविषयप्रतियोगितावा अनुगतत्वेनैव वृत्तित्वनियामकत्वाभिमानात्सावाहिति घटत्वादिना वाच्यत्वाभावोपि लक्षण
घटकः। अथैवं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितलक्षणे वह्नित्वाद्य
वच्छिन्नसाध्यकस्थले वह्नित्वादिना धूमाद्यभाववतो लक्षण्या घटको न स्यात् व्यापकतावच्छेदकवह्नित्वादिपर्याप्तप्रतियो
गितावच्छेदकताकत्वविरहात् महानसीयवह्नित्वाद्यवच्छिन्नाभाववारणाय अवच्छेदकतापर्याप्तिविवक्षणस्यावश्य
कत्वादिति चेन्न। व्यापकतावच्छेदकपर्याप्तत्वं व्यापकतानवच्छेदकानतिरिक्तत्वं इन्धनवाद्यवच्छिन्नवत्त्वमावश्य
तियोगितावच्छेदकतायामस्तत्वमिति तादृशाभावमादायैव तल्लक्षणसमन्वयसंभवात्। अत एव प्रमेयधनत्वा
घटत्वे वह्न्यभावाधिकरणीभूतमहानसादिवृत्तित्वाद्देशसावच्छेदीधिति ग्रन्थः संगच्छते। अन्यथा धूमत्वादिना
घटाद्यभावापेक्षया निरवच्छिन्नतापत्तेः। एवं च सावच्छिन्नानामेतल्लक्षणासिद्धव्यापकतया सम्भवापि तया वाच्यत्वाभा
वाघटत्वप्रसिद्धत्वमिति मूलग्रन्थोपवर्णनमपि संगच्छते। अथ पर्याप्तिसंबन्धेन यत्रोभयत्वादिकं साध्यतावच्छेदकं त
त्र प्रतियोगितायाः अव्यासज्यवृत्तित्वेन तत्पर्याप्त्यधिकरणप्रत्येकव्यक्तौ पर्याप्तिसंबन्धेनोभयत्वादेरसत्त्वात् तादृशावच्छे
दच्छिन्नभेदस्य च सत्त्वात् तस्य प्रतियोगिताव्यापकत्वं न संभवति। न चाव्याप्यवृत्तिसंयोगादेरिव साध्यतावच्छेदकता

राम
८९

तत्र प्रतियोगिताव्यापकत्वं निर्वाच्यं प्रतियोग्यसामानाधिकरण्यं व्यापकताघटकाभावे निवेशनीयं तावतोभयत्व
स्यापि व्यापकत्वं निर्वहति पर्याप्तिसंबन्धेनोभयत्वपर्याप्त्यधिकरणस्य प्रत्येकानतिरिक्तत्वात् प्रत्येकघटितोभय
त्वाभावस्यापि प्रतियोगिसमानाधिकरणत्वादिति वाच्यं पृथिवीत्वघटत्वोभयत्वादिना यत्र साध्यता तत्र जाति
त्वावच्छिन्नाभावप्रतियोगितासामानाधिकरण्यस्य तादृशसाध्यतावच्छेदकाभावस्य प्रतियोग्यधिकरणाद्
वृत्तित्वविरहेण तादृशसाध्यतावच्छेदकस्य तादृशप्रतियोगिताव्यापकतापत्त्या तादृशाभावमादाय तदवच्छिन्न
साध्यकद्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतावतिव्याप्त्यापत्तेः प्रतियोग्यनधिकरणवृत्तित्वस्यैवाभावे निवे
शनीयतया उभयत्वाभावव्यावर्त्तनासंभवात् तदभाववतः प्रत्येकं तदनधिकरणत्वात् तस्य वृत्तस्याधिकरणता
या अपि व्यासज्यवृत्तित्वादिति चेन्न सामानाधिकरण्यस्याव्याप्यवृत्तित्वापत्तेः प्रतियोगिसामानाधिकरण्याभा
वविशिष्टाभाववत्ताघटितव्यापकताया एव निवेशासंभवात् पृथिवीत्वाद्युभयत्वविशिष्टपृथिवीत्वाद्यवच्छि
न्नतदभावस्य प्रतियोगिसमानाधिकरण्यात् तेषामपि उभयत्वादेस्तत्सामानाधिकरण्यस्य वैशिष्ट्ये तदभावत्वेना
तिप्रसंगाभावात् उभयत्वाद्यभावस्य तदभावत्वं केचिदिमेऽपि तत्सामानाधिकरण्याभावानभ्युपगमात्
तत्सामानाधिकरण्यावच्छेदकस्य प्रत्येकानतिरिक्तत्वात्। अथवा पर्याप्तिसाध्यतावच्छेदकतावच्छेदकसंबन्धसा
मान्यप्रतियोगितानधिकरणं यत्किंचिद्ध्यनुयोगिकत्वाभाववत्तद्भिन्नत्वमेव प्रतियोगिताव्यापकत्वमुभयत्व

गा॰ टी॰ शि॰
९०

निरूपितत्वपर्याप्तीतु न प्रत्येकान्तु योगिकत्वाभावः तद्नुयोगिनः प्रत्येकानतिरिक्तत्वादिति । यत्तु प्राचीनमते रूपादि
सामान्याभावस्य रूपत्वध्वंसत्वप्रागभावत्वप्रतियोगिकत्वारूपध्वंसादिसाध्यकरूपादि हेतावति व्याप्तिः रू
पादिसामान्याभावीयसत्त्वध्वंसत्वावच्छिन्नप्रतियोगितायाः साध्यतावच्छेदकसमनियतत्वेनेत छुटिताभावकूटा
धिकरणे रूपादेरवृत्तेरिति तन्न रूपत्वापिरूपध्वंसाभावरूपपर्याप्त छुटितस्य रूपसामान्याभावाघटितकूटस्या
पि यावतामेकाधिकरण्यमिति विवक्षया लक्षणघटकत्वाच्चेति तोहेत्वत्नोक्तानि व्याप्तिरिति वा यो रूपादेनोंऽ
सेकत्वध्वंसाभावरूपत्वेपि रूपादिध्वंसाघप्रागभावात्मकत्वया साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वा
रहेण लक्षणाघटकत्वादिति तन्न जलपारमाण्वादेरूपध्वंसत्वाघवच्छिन्नाभावबुद्धिनिर्वाहाय जन्यरूपत्वाव
च्छिन्नाभावेरूपध्वंसत्वावच्छिन्नप्रतियोगिताकत्वकल्पनस्यावश्यकतया तत्त एव रूपादिसामान्याभावत्वापि
तत्वतीति निर्वाहात् रूपादिसामान्याभावस्य रूपध्वंसादिप्रतियोगिकत्वानभ्युपगमात् साधनसमानाधिकर
णत्वस्य साध्याभावविशेषणतापक्षे तेनाप्युक्तरूपादिसामान्याभावाव्याप्तिवचनात् । उक्तविरूपकाभावत्व
संबंधेन साध्यतावच्छेदकसमनियतप्रतियोगिताककूटाधिकरणत्वमेव निवेश्यतद्दोषस्य परिहार्यत्वात्
रूपादिसामान्याभावानधिकरणस्यापि जलपरमाण्वादेस्तत्कूटाधिकरणत्वेनाव्याप्त्यभावात् नच कारणा
न्यप्रतियोगितायाः प्रतियोगिस्वरूपत्वमते नानाव्यक्तिसाध्यकस्थले साध्यतावच्छेदकसमनियतस्य प्रत्येक प्र

राम
९०

तियोगितायामसत्वेपि स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेन समनियतस्य विवक्षणान्न दोषः । अत एव वह्नि
त्वादि स्वरूपप्रतियोगितानामपि स्वावच्छेदकावच्छिन्नधर्मत्वलाघवच्छिन्नतदभावप्रतियोगितात्वेन वह्नित्वघ
त्वादिसमनियत्वात् वह्नित्वाघवच्छिन्नवह्न्यादिस्वरूपप्रतियोगितानां द्रव्यत्वाघवच्छिन्नाभावीयवह्न्यादिस्वरूप
प्रतियोगितात्मकतया तदवच्छेदकद्रव्यत्वाघवच्छिन्नप्रतियोगिताया घटादावपि सत्वात् न तत्प्रतियोगितावच्छे
दकावच्छिन्नप्रतियोगितात्वेन वह्नित्वादिसमनियत्वमिति तदभावीयत्वविशेषणं तथा सति वह्नित्वाघवच्छिन्नाभावीय
प्रतियोगिताया घटादावसत्वेनानुपपत्तेः । यद्यप्येवमपि वाच्यत्वादिसमनियतप्रतियोगिताप्रसिद्धिर्वारव
द्व्यधिकरणधर्मावच्छिन्नाभावानामभिन्नतया वाच्यत्वादिस्वरूपवाच्यत्वभिन्नत्वावच्छिन्नाभावीयप्रतियोगितावच्छे
दकघटत्वाघवच्छिन्नप्रतियोगितानां घटादावपि सत्वात् । यत्किंचिदेकधर्मावच्छिन्नतदभावीयप्रतियोगितात्वे
न समनियतस्य पदकव्याप्यत्वविवक्षणे च पृथिवीत्वाघभावादिसाध्यकस्थले घटत्वाद्वित्वाघवच्छिन्नाभावयोर
भिन्नत्वेन तदभावीयपृथिवीत्वाभावादिप्रतियोगितानां पृथिवीत्वाभावत्वाघवच्छिन्नाभावीयप्रतियोगितात्मक
तया पृथिवीत्वाभावत्वादिरूपतदवच्छेदकावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वाभावत्वादिसमनियतत्वात् त
थापि पदधर्मावच्छिन्नप्रतियोगितात्वेन यदभावनिरूपितत्वं ताहशधर्मावच्छिन्नतदभावीयप्रतियोगितात्वेन सम
नियतत्वं विवक्षणान्न दोषः । पृथिवीत्वाभावत्वावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वादिरूपाभावमात्रनिरूपितत्वेन

गा-दी-मि
९१

वृषदादीतितावच्छिन्नाभावनिरूपितत्वमिति यद्यपि पूर्वदलस्य वैयर्थ्यं वह्न्यादिसाध्यके धूमादिहेतौ साध्यतावच्छेद
कसंबंधावच्छिन्नसाध्यतावच्छेदकव्यापकप्रतियोगिताकत्वलक्षणदलेतितावच्छिन्नाभावकूटाधिकरणत्वस्य
णादोप्रसिद्धत्वेपि तत्र हेतुतावच्छेदकसंबंधेन हृदत्वेन प्रसिद्ध्या व्याप्तिसंभवः तथापि साध्याभावकूटवत्तितादृश
हेतोरप्रसिद्ध्या व्याप्तिरत इदं विशेषणं पिसन्नावा जातेरित्यादौ वक्ष्यते द्रव्यत्वादिरूपे तत्र कूटाधिकरणाप्रसिद्ध्या व्या
प्तिवारणरूपं प्रयोजनमाह पृथिवी जलाभाववान् द्रव्यत्वादिति तत्राद्यपक्षेति घटपटादेरूपेत्यर्थः। सदेतावित
तत्र साध्ये यः स हेतुर्जलत्वादिस्तत्रेत्यर्थः नाव्याप्तिरित्यनेनान्वयः। यावतामेकाधिकरण्यं संभवति तावद्यत्ता
वत्समुदायाधिकरणाविवक्षायां तादृशासंभवे रुत्तोत्तरव्याप्तिनिरास पृथिवीत्वादित्वादिद्रव्यत्वादेः समवा
येन हेतुत्वे नाति तावच्छिन्नाभावकूटाधिकरणे समवायेन हृदत्वे प्रसिद्ध्यातिव्याप्तेरनवकाशात् तत्कसंबंधे
न हेतुतानुसरणं साधनसमानाधिकरणत्वस्य साध्याभावे विशेषणत्वे पिजलादौ तत्तेनो वृत्तितावच्छिन्न
समवायावच्छिन्नाभावकूटाधिकरणतायाः सामान्याभाववद्वृत्तेरव्याप्तिर्दुर्वारैवेति ध्येयं द्वितीयदलस्यो
जनमाह नाघीति घटत्वाभाववत्त्वादिना साध्यतायां घटादावेव साध्याभावकूटाधिकरणत्वप्रसिद्धेरत उक्तं सा
ध्यवत्त्वाहिन्नेति आदिपदग्राह्यमेयत्वादिपरिग्रहः तत्तत्साध्येति घटत्वाभावपटत्वाभावरूपसाध्यपः साध्यतावच्छे स
दकव्याप्यप्रतियोगिताकाः घटत्वपटत्वादिरूपो भावस्तत्समुदायाधिकरणाप्रसिद्धेरित्यर्थः। यावतामेकाधिकर राम

९१

विशेष्यणतापर्यन्तमतितावच्छिन्नाभावस्य साधनतासमानाधिकरणतया करणत्वमपि
प्रत्येकं साधनसमानाधिकरणत्वा ३

ण्यं संभवतीति विवक्षायामपि तादृशाभावसमुदायवति घटादौ हेतौ तादृशाव्याप्तिरेवान यावतामभावानामेकाधि
करण्यं संभवति तादृशतादृशाभावकूटाधिकरणं यत् तत्तावदन्यतमवृत्तित्वसमनियतप्रतियोगिताकोभावो
विवक्षणीयः घटत्वत्वावच्छिन्नाभावपटत्वावच्छिन्नाभावे न तथा जगत एव तावदन्यतमत्वेन तत्साक्षात् अपितु घ
टत्वादिना जगद्वृत्तित्वसामान्याभाव एव तादृशं वृत्तिस्तथाविधेऽभावः तदधिकरणान्यतमत्वं च तत्तदधिकरणा
वृत्तित्वं न तु तदधिकरणान्यान्यतमतो नाप्रसिद्धिरितिवाच्यं एवमपि जातिप्रतियोगिकाभाववान्मेयत्वादि
त्यादौ जातिमत्तावत्प्रत्येकं घटत्वपटत्वघटिततादृशतादृशकूटाधिकरणतया जातिमद्वृत्तित्वावच्छिन्नाभावस्या
पि तादृशतया व्याप्तिर्दुर्वारत्वादिति॥ अत्र साध्याभाववत्तायां संबंधविशेषानिवेशे कालपरिमाणवान्मेयत्वादि
त्यादावतिव्याप्तिः कालस्यापि कालिकसंबंधेन कालपरिमाणाभावाधिकरणतया जगत एव साध्याभावकूटव
त्वात् दैशिकविशेषणतासंबंधनिवेशे च घटत्वाभाववान् पटत्वादित्यादावव्याप्तिः घटत्वादेस्तेन संबंधेन वृत्ते रा
तेन संबंधेन तद्घटितकूटाधिकरणाप्रसिद्धेः तेन संबंधेन वृत्तिमत्त्वस्याभावविशेषणत्वे तु घटत्वाभाववत्साध्यके
व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिः। कालिकसंबंधावच्छिन्नप्रतियोगिताके घटत्वाभा
वाभावे साध्ये आत्मत्वादिहेतावव्याप्तिश्च घटातिरिक्तवस्तुमात्रस्यैव दैशिकविशेषणतया साध्याभावकूटव स
त्वात् साध्यनिरूपितप्रतियोगितावच्छेदकसंबंधनिवेशोप्ययमेव दोषः किंचिद्विशिष्टतादृशसाध्यस्याभावकरा गादाधरी

गा॰टी॰व्या॰
९२

स्वदैशिकविशेषणतासंबंधावच्छिन्नाभावस्तद्रूपस्य तद्दैशिकविशेषणताया अपि निरुक्तसाध्यनिरूपितप्रतियो
गितावच्छेदकसंबंधत्वात् स्वनिष्ठतादृशप्रतियोगितावच्छेदकसंबंधेन स्वाधिकरणत्वनिवेशे तु व्यधिकरणध
र्मावच्छिन्नाभावस्य साध्याप्रतियोगितया तत्संग्रहप्रसंग इति साध्यतावच्छेदकसंबंधेन प्रतियोगितावच्छेद प्र
कविशिष्टसाध्यवत्ताज्ञाने प्रति यत्संबंधावगाहियदभावज्ञानं प्रतिबंधकं तेन संबंधेन तदभावाधिकरणत्वं
विवक्षणीयं व्यधिकरणधर्मावच्छिन्नाभाववत्ताबुद्धेरपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिप्रकारकबुद्धिं
प्रतिबंधकत्वात्तादृशाभावस्य लक्षणघटकत्वानिर्वाहः यदि चाभाववत्ताज्ञानं प्रति दैशिकविशेषणता
संसर्गकमपि तदभावाभावत्वावच्छिन्नप्रकारकज्ञानं प्रतिबंधकं अभावाभावस्यातिरिक्तत्वमते तादृश
ज्ञानप्रतिबंधकताया आवश्यकत्वात् तस्य प्रतियोगिस्वरूपत्वमते ऽपि कसाम्यात्तु रोधेन तस्यावश्यकत्वात्
अभावाभावस्यातिरिक्तत्वग्रहदशायां प्रतिबंधकताया उपपत्तेर्बलात् एवं च कालिकसंबंधावच्छिन्नप्रति भ
योगिताकघटत्वाभावजातित्वाभावादेरसाध्ये आत्मत्वजातित्वादौ व्याप्तिधुर्यैरेव दैशिकविशेषणता
संबंधस्यापि निरुक्तस्याक्रांतत्वात् न चैवं तादृशसाध्यवत्यपि पक्षे तादृशसाध्याभावत्वावच्छिन्नप्रकारकप्र
मारूपप्रतिबंधकज्ञानसंभवात् तद्विषयस्य हेत्वाभासतापत्तिरिति वाच्यं तत्र च पक्षे साध्यं नास्तीति ज्ञानस्य प्रम
त्वनिर्वाहे मिति तदुपपादनाय तादृशसाध्यप्रतियोगिनस्तादृशसाध्याभाववत्त्वेन दैशिकविशेषणतयाहृत

राम
९२

॥ उक्तानेयप्रत्यान्वितस्यार्थवि ४

नद्युपगमादिति तु व्यमेतदा...कसंबंधेन साध्याभावत्वावच्छिन्नाधिकरणत्वकूटवत्त्वमेव विवक्षणीयं हेतुमति ता
दृशाधिकरणताविरहान्नोक्ताव्याप्तिः परंतु घटत्वादेरपि दैशिकविशेषणतास्वीकार आवश्यकः अन्यथा
घटो न घटत्वाभाववानित्यादि न तु ह्रदस्य प्रतीतिप्रतीतिव्यवहारयोरनुपपत्तिः कालेन इव तत्प्रमितादि प्रयोगासा
वात् दैशिकविशेषणतासंसर्गावगाहिबोधजनकत्वस्य च नञ्पदव्युत्पन्नत्वात् न चाभावरूपप्रतियोगिवाचक
पदसमभिव्याहृतनञो दैशिकविशेषणतया अभावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञः प्रतियोगि
तत्त्वाभावप्रतियोगितावच्छेदकः संबंधः प्रत्याय्यत इति व्युत्पत्तिरिति वाच्यं प्रतियोगितावच्छेदकसंबंधत्वेन
संबंधमात्रे ह्नलात्वविशिष्यसमवायकालिकादिसाधारणेसेवव्युपगंतव्यत्वात् प्रतियोगिधर्मावसंबंधविशेषाव
श्रा च्छिन्नप्रतियोगितावोधकाद्व्यमभावो नास्तीत्यादितः संबंधविशेषावच्छिन्नाधेयताप्रतीतेर्नियामकाभावात् भ॰मा
समभिव्याहारविशेषनिरपेक्षस्य तास्यस्यैव नियामकत्वे कालिकादिसंबंधावच्छिन्नप्रतियोगिताकआत्मत्वाभा
ददै वोऽसावस्य समवायादिसंसर्गकतासंपेणात्मन्ययमभावो नास्तीति प्रत्ययप्रसंगात् वास्तवतत्संबंधावच्छिन्नप्र स्यात्मत्वरूपभा
तियोगिताकाभावरूपप्रतियोगिवाचकसमभिव्याहारस्य तत्संबंधसामान्ये नियामकत्वे परंतु कालिकसंबंधावच्छि वसत
न्नप्रतियोगिताके भिन्नसावकालिकसंबंधावच्छिन्नप्रतियोगिताकत्वसंग्रहव्याप्यो ऽयमभावो नास्तीति वा श्रा
वद्यादधिकरणे एतदभावाभावप्रतीतावपि जाधिकरणे कालिकसंबंधेन तदभाववत्त्वादिसंग्रहस्य सर्वानुभवसि सा

गदा-टी-शि.
९३

दुखोक्तेदूषणे॥ अथैवं कालिकत्वपि कालिकसंबंधावच्छिन्नघटत्वाभावो नास्तीति प्रतीत्यनुरोधेन घटत्वादे
र्दैशिकविशेषणतास्वीकारस्यावश्यकतया तत्समवायावच्छिन्नघटत्वाभावो नास्तीति व्यवहारापत्तेरिति चे
न्न प्रतियोगिमातिरिक्तभावत्वेन दृष्टान्तत्वस्य उपगमात्। इत्थं च दैशिकविशेषणतासंबंधेन साध्याभाववत्त्वावच्छि
न्नवत्त्वलक्षणे निवेशनीयं कालिकसंबंधावच्छिन्नप्रतियोगिताकघटत्वाभावाभाववान् आत्मत्वादित्यादौ घ
टत्वाभावस्य तादृशसाध्याभावत्वेन सम्भवत्तेर्नाव्याप्तिः। एतेन यादृशसाध्यकस्थले साध्याधिकरणे साध्या
भावस्य तदधिकरणे च साध्यस्य न सम्भवः प्रसिद्धः तत्र प्रतिबध्यप्रतिबंधकभावकल्पनासंभवेन प्रतिबंधक
भिविते नि ताघटितलक्षणस्याव्याप्तिरिति निरस्तम्। तदुभयेति। द्रव्यत्वपृथिवीत्वान्यतरत्वावच्छिन्नप्रतियोगितायाअपि
तदुभयत्वसमनियततया तादृशाभाववतो गुणादेरेव निरुक्तसाध्याभावकूटाधिकरणत्वात् इति भावः। प्र
तियोगिवैयधिकरण्याघटितस्य व्यापकत्वस्य साध्यतावच्छेदकविशेषणत्वमुपगम्यत्वदुभयत्वविशिष्टैक
गुणस्यत्वाभावसत्त्वेन तस्य प्रतियोगिताव्यापकत्ववारणेपि तदूपावच्छिन्नसाध्यकसद्धेतावव्याप्तिः द्रव्यत्वाव्यास
मानुगमधर्म ज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररूपेण साध्यतावच्छेदकसजातीयोयो धर्मस्तदवच्छिन्नत्वस्य प्रतियोगिता अनुगम
विशेषणत्वोपगमेपि तादृशातिव्याप्त्यवकाशाभ्यां तस्य कान्तरेति व्याप्तिमाह अपिचेति। द्रव्यत्वलाघवच्छिन्नेति
गुरुद्रव्यत्वलाघवच्छिन्नेत्यर्थः। पृथिव्यन्यतरविशिष्टद्रव्यत्वत्वसमव्याप्तत्वादिति। विशेषणावच्छिन्नस्य गुरुवि

राम
९३

शेष्यानतिरिक्तत्वादिति भावः। तदवच्छिन्नाभाववति गुणादावेव यथोक्तसाध्याभावकूटाधिकरण्यात् इति भावः।
विशिष्टस्यातिरिक्तत्वेन साध्यतावच्छेदकस्य प्रतियोगिताव्यापकत्वस्थाने प्रतियोगितावच्छिन्नव्यापकताव वधिदृष्टा
च्छेदकत्वनिवेशेन वा विशिष्टद्रव्यत्वादिसाध्यकस्थले गुरुद्रव्यत्वाघभावस्य वारणासंभवात् दूषणान्तरमाह
किंचेति। तत्साभावेति। रूपलाघवच्छिन्नाभावकूटस्येत्यर्थः। सद्धेतावतिव्याप्तिसूचनाय। सकलरूपव्यत्वाधिकरणा
प्रसिद्धेरिति। तथा च तद्घटितसामान्याभावकूटाधिकरणाप्रसिद्ध्याव्याप्तिरिति भावः। यावतामिति। तथा च =
प्रकृते सकलरूपघटितसमुदायस्य नलक्षणघटकता सकलरूपाणामेकाधिकरण्यविरहात् किंतु एके
करूपवदधिकरणधर्मावच्छिन्नाभावघटितकूटानामेव प्रत्येकं तदधिकरणता च रूपवत्त्वेन प्रसिद्धेतिना
व्याप्त्यवकाश इति भावः। इदमिति। वायोः पृथिवीवृत्तित्वविशिष्टसंयोगादिसत्त्वात् उक्तसाध्यव्याप्तिवारिता।
गुणसामान्याभावस्य साध्यत्वे वायवीयस्पर्शादिरूपिता भावः। तद्घटितनिरुक्ताभावघटितकूटवद्वृत्तित्वा
भावस्य यावदन्तर्गतस्य वायुतासावात्यन्ताभावात् व्याप्तिसंभवइति पृथिवीत्वमिति पक्षे वायुवृत्तित्वपक्षे वायुवृत्तित्वा
दिरूपपृथिवीवृत्तित्वगुणाभावाभाववानित्यावतामेकाधिकरण्यसंभवेन तद्घटितकूटस्यापि लक्षणघटकतया त
इतिवायोर्हेतोर्द्रव्यसानातिव्याप्तिसंभवः। नन्वधिकरणादिरूपसाध्याभावस्य कालिकोव्याप्यवृत्तितया व्याप्यवृत्तित्व
विशेषणेन तद्वारणे आहेति। पार्थिवपरमाण्वेकत्वादिरेव लक्षणघटकव्याप्ततिव्याप्तिर्दुर्वारेति नाव्याप्तिर्नवीनमतेहि उत्पत्तिकाल-प्रस
त्वेन

त्वादिमतितत्त्वाण साधादिकाळावच्छेदेन तद्वत्तेनासार्वसत्वादित्वादेरपि व्याप्यवृत्तित्वादिति पृथिवीपदमेतत्पृथिवी
रोद्वन्मनित्यत्व पृथिवीपदयोः कर्मधारयो वा अस्मिन्मते न च स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमनवच्छि
न्नवृत्तिकत्वं वाव्याप्यवृत्तित्वं ननु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं तच्च नादित्वादिसाधारणमिति पृथिवीसा
मान्यपरत्वेपि न क्षतिरिति वाच्यं एतद्धि तु वाक्यविवरणानुरोधेनात्यन्ताभावघटितव्याप्यवृत्तित्वस्यैव निवेशयितुमुचि
तत्वात् एतद्रूपात्यन्ताभावनोघ्यत्वादित्वादेवेतद्रूपात्मकाभावस्य लक्षणाघटकत्वात्तिव्याप्त्यापत्तेः प्राचीनमते
अत्यन्ताभावघटितव्याप्यवृत्तित्वनिवेशस्यावश्यकत्वाच्च अत एव चाग्रे तद्रूपादिघटितत्वेनेत्यपि साधु संगच्छ
ते पार्थिवरूपमात्रस्यैवानित्यत्वात् या अत्यन्ताभावघटितव्याप्यवृत्तित्वनिवेशे तस्य व्याप्यवृत्तित्वाभावेन तद्दोषसं
स्यापत्तेः पृथिवीवृत्तीत्यत्र वृत्तिः समवायेन बोध्या तेन स्पर्शादेः कालिकसंबंधेन पृथिवीवृत्तित्वेपि न क्षतिः पृथि
वीसमवेतत्वावच्छिन्नाभावो गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेप्यसिद्धः पृथिवीसमवेतत्वावच्छिन्नप्रत्येकासि
मतायां प्रतियोगितायां केवलसमवेतत्वस्यैवावच्छेदकत्वसंभवेन पृथिवीसमवेतत्वस्याभावप्रतियोगितानवच्छे
दकत्वात् न च पृथिवीसमवेतत्वावच्छिन्नाभाया जलत्वादिव्यावृत्तप्रतियोगिताया अतिप्रसक्तसमवेतत्वेनाव
च्छेदकत्वसंभवात् तथा च समवेतत्वावच्छिन्नप्रतियोगितातोऽतिरिक्ताया जलत्वादिव्यावृत्तप्रतियोगिता
या एवाप्रसिद्धेः गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वेपि पृथिवीसमवेतत्वावच्छिन्नाभावसाध्यकेनातिव्याप्ति

राम
९४

स्तैव ताद्दशाभावस्य समवेतत्वावच्छिन्नाभावसमनियतत्वात् तद्भिन्नत्वेन समवेतमात्रस्यैव तदभावत्वाद्युक्ता
देरपि तथात्वात् न च पृथिवीसमवेतत्वविशिष्टाभाववृत्तिजलत्वादिसमवेतत्वावच्छिन्नाभावविरहान्नतयोः समनैय
त्यं एवं च गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वमतेपि पृथिवीसमवेतत्वस्य ताद्दशविशिष्टाभावप्रतियोगि
तावच्छेदकत्वमावश्यकं समवेतत्वविशिष्टवृत्तिजलत्वादेस्तत्त्वेन तन्मात्रस्य तत्प्रतियोगितावच्छेदकत्वासंभवा
द्वृत्तिवाच्यं विशिष्टाभावस्य साध्यत्वेन स्ववायुसाधारणतया सद्धेतुसमसंगेन पृथिवीसमवेतत्वोपलक्षिताभा
वस्यैव साध्यतयाउपगंतव्यत्वादिति गुणो पादानं पृथिवीसमवेतगुणत्वावच्छिन्नाभावो गुणादिसाधारणत्वान्न
समवेतत्वावच्छिन्नाभावसमनियतश्चेति नोक्तदोषावसरः ध्वंसप्रागभावावच्छिन्नेसामान्याभावमुपगच्छतां वा
द्यादेरपि उत्पत्तिकालावच्छेदेन पृथिवीवृत्तिगुणसामान्याभाववत्वात्तत्साध्यको वायुत्वादिः सद्धेतुरेव तेनाति
व्याप्तिसंभवद्भुत्वतः साध्योत्तरमाह सत्तान्येति सत्तान्यत्वनिवेशनं प्रयोजनं रूपवत्त्वायुत्वादेरपि सत्तान्यसमवे
ताभावाभाववत्वात् पृथिवीति अत्र पृथिवीपदं पृथिवीसामान्यपरमेव घटत्वाद्युक्तिर्वादेः स्वसमानाधिकरणा
त्यन्ताभावप्रतियोगित्वेन व्याप्यवृत्तित्वविशेषणव्यावृत्तत्वाद्रूपादिघटितत्वेनेत्यत्र रूपपदोपादानं प्राचीनमताभि
प्रायेणोपन्यस्तं रूपं साध्यमसिद्धमित्यत्रैव साध्यसामानाधिकरण्यविशेषणेनवायुत्वे नाव्याप्तिरतो द्वितीयलक्षणानु
सरणं ननु सन्नियताभावकमते सत्तान्य पृथिवीसमवेतत्वावच्छिन्नाभावस्य सत्तान्यद्रव्यसमवेतत्वावच्छिन्ना

गा-टीका ९५

भावासिद्धेतयाविशिष्टस्तसमवेतपृथिवीसमवेतत्वावच्छिन्नाभावविशिष्टसमवेतस्पर्शवत्समवेतत्वावच्छिन्नाभावा
भिन्नतयाव्याप्तत्वाहेरपितत्साध्यकंतेनतादृशाभावसाध्यकेतिव्याप्तिःसंभवतीतिपूर्वोक्तोवारूप्याभावव
न्वायुत्वादित्यत्राव्याप्तेरेवोक्तत्वेविवक्षायांतुवारितमाह वस्तुतस्तु इति अत्रायमाशयः यावन्तिसाध्याधिकरणानितावत्स
मुदायाधिकरणमितियस्य यत्किंचिदधिकरणवृत्तित्वसकलसाध्याभावाधिकरणत्वे यत्किंचिदधिकरणवृत्तित्वसा
ध्याभावत्वव्यापकाधेयताकत्वपर्यवसितमर्थः साध्याभावाधिकरणाधिकरणकसकलसाध्याभावाधिक
रणत्वेसाध्याभावसमानाधिकरणसाध्याभावत्वव्यापकाधेयत्वकत्वपर्यवसितंवा आद्येव्याप्तिचारिमात्रे
तिव्याप्तिः जगत एव साध्य[illegible]वत्त्वसत्तिंकिंचिदधिकरणवृत्तित्वसकलसाध्याभाववत्वात् इति समुदायोपाद
नस्याकिंचित्करतयातद्विलक्षणासंभवः द्वितीये च साध्याभावसमानाधिकरणसाध्याभावत्वमुक्तरूपकेनि
खिलरूपाण्येवाक्षतमितितादृशसाध्याभावत्वव्यापिकानकेनाप्यधिकरणेनानिरूपिताधेयतेतितादृशाधि
करणाप्रसिद्धिरस्त एवस्तेवेति ननु स्वरूपनिसाध्याभावत्वव्यापकं यदधिकरणवृत्तित्वं तत्तदधिकरणवृत्तित्वसा
ध्याभावत्वव्यापकस्य वृत्तितानिरूपकाधिकरणमेवाधिकरणमित्यर्थः धूमवान्वह्नेरित्यादौ महानसादिनतथाऽयोगोल
कवृत्तितापारस्तवृत्तिसाध्याभावत्वव्यापकत्वात् अयोगोलकादिवृत्तिसाध्याभावत्वस्य च समानाधिकरणधर्माव
च्छिन्नसाध्याभावसाधारणतयातद्वृत्तिताव्याप्यत्वात् इत्ययोगोलकाप्रवेशात् द्रव्यं स्वभिन्नमित्यव्याप्तिः तादृशाकिं

राम ९५

चिदधिकरणवृत्त्यादिवृत्तित्वाभावस्य कृत्यादौ सत्त्वेपि निरूपितताद्वयं यत्र चेत्तावदन्वतमवृत्तित्वं तत्समनियतप्रतियो
गिताकाभावविवक्षणात् अन्यतमत्वं तत्तद्वृत्तिभिन्नत्वं ननु तत्तदन्योन्यत्वम् अतो न दोष इत्यपि साध्यके प्रसिद्धि
रितिवाच्यं तादृशरूपं यत्तत्तदधिकरणवृत्तित्वाभावकूटवत्त्वं न केवलान्वयिसाध्यके व्याप्तिर्हि तुमतोपि
तयात्वात् इति तत्तदुपेक्षितंरूपसामान्यसाध्यवान्वायुत्वादित्यादौ च सकलरूपवतामेव तथात्वं द्रव्यं इति तत्वात्
वतत्तद्रूपादिवृत्तिसाध्याभावत्वव्यापकत्वादतोऽव्याप्तिः अथवा स्ववृत्तिसकलसाध्याभावसमानाधिकरणसाध्या
भावत्वावच्छेदेन यदधिकरणवृत्तित्वं तादृशयत्किंचिदधिकरणवृत्तिसकलसाध्याभाववत्त्वमेव व्याप्तितामित्यर्थ
र्थः धूमवान्वह्नेरित्यादौ च तादृशयत्किंचिदधिकरणेन साध्यवद्वृत्तिसकलसाध्याभावसमानाधिकरणस्य
साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य तद्वृत्तित्वाभावात् किंतु अयोगोलकादावेवेति नातिव्याप्तिः रूपाभाव
वान्वायुत्वादित्यादौ च तादृशाधिकरणं तद्वृत्त्यादिरेव व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव तद्वृत्तिसकलसा
ध्याभावसमानाधिकरणत्वात्तस्य च तद्वृत्तित्वनियमादिति नाव्याप्तिः प्रसरः शेषं पूर्ववत् अथवा व्यासज्यवृत्ति
साध्याभावमात्रवृत्तिधर्मावच्छिन्नाधिकरणत्वमेव साध्याभावकूटाधिकरणत्वे जगत एव साध्याभाववत्त्वावच्छिन्ना
धिकरणतयाव्यभिचारिण्यतिव्याप्तिवारणाय व्यासज्यवृत्तिधर्मावच्छिन्नेति व्यासज्यपि जगत एव व्यधिक
रणधर्मावच्छिन्नसाध्याभावमात्रवृत्तितयाविधधर्मावच्छिन्नाधिकरणत्वात् स एव तदवृत्ति आधेयतावच्छेद

कतादृशधर्मस्य वृत्तित्वाघ्यापत्तस्यत्वेन धर्मो विशेषणीयः। स्वनिष्ठेत्वं च समानाधिकरण्याभावप्रतियोगि
त्वमात्रं तु तत्रच्छेत्वं तद्व्यधिकरणधर्मावच्छिन्नसाध्याभावोसत्त्वादिति वक्तादृशोधर्मसत्त्वस्य तत्रोतर साधारण
त्वितादिस्य तद्वृत्तित्वोपेताद्यन्नित्वापवच्छिन्नस्य कविद्यतेः तस्याधेयतान्नवच्छेदकतया धेयतावच्छेदकी
भूततादृशधर्मस्य वृत्तितावि रहात्। न च समनियताभावैक्ये व्यधिकरणधर्मावच्छिन्नाभावमात्रवृत्तित्वा
स्य वृत्तिधर्माप्रसिद्ध्या केवलान्वयि साध्यके व्याप्तिरिति वाच्यं। तथा सति व्यासज्यवृत्तित्वस्य च्छेद्यवतस्य
वृत्त्यनेकवृत्तिधर्मभिन्नत्वस्य निवेशनीयत्वात्। केवलान्वयिसाध्यके साध्याभावत्वस्यैवं तथात्वात्। इत्याशयाद्दोषां
तरमनाय द्वैतोहेतुतावच्छेदकसंबंधेन विशेषयति। किं चेति। रूपमात्र व्याप्तिरिति। वह्निमन्मात्र समवेतघटादौ च
र्तमानस्य निर्वृत्तिसमवेतत्वाभावस्य तत्र सत्त्वादिति भावः। एतच्च यत्किंचित्संबंधावच्छिन्नतादृशवृत्तित्वस्य
मनियतप्रतियोगिताकाभावनिवेशाभिप्रायेण अन्यथा निर्वृत्तिसंयुक्तत्वादिसाधारण्यतादृशवृत्तित्वे प्रतितथा
विधाभावप्रतियोगितायां अव्यापकतात्सत्त्वसंघटकतया वृत्तिमन्मात्रस्यैव साध्याभावाधिकरणका
देहेतोर्निर्वृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव हेतुमद्वृत्तितादृशाभावस्य संग
तेः। अतएव संबंधमनिवेश्य तादृशाधिकरणवृत्तित्वसमनियतप्रतियोगिताकाभावानिवेशरूपस्वरूपात
रमाह। साध्यतावच्छेदकसंबंधेनेति। एतच्च कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य साध्याभावस्य कोकादा

राम ९६

वसतोपि तस्य यथा विवक्षितसाध्याभावसमुदायत्वम्मतमेवेति स्पष्टनाय। कालादावित्यादिपदादि घटतादि
संबंधेन वस्तुमात्रसंबंधिनः ईश्वरज्ञानादेः परिग्रहः। व्यभिचारिणीति। यत्साध्यके वृत्तिमन्मात्राधिकरणस्य का
लादेर्विवक्षितसाध्याभावकूटवत्तेतादृशव्यभिचारिहेतावित्यर्थः। द्रव्यत्वसाध्यके द्रव्यत्वपृथिवीत्वान्यतरा
भावगुणद्रव्यत्वाभावयोर्विधुत्वादिहेतुकेरूपाद्यात्मकसाध्याभावस्य सत्त्वादिसाध्यके संयोगेन समवायेन
वायत्रैव हेतुः तत्र सत्तात्वावच्छिन्नाभावस्य च साधनवृत्तित्वात्। साधनसमानाधिकरणत्वेनाभावे विशेषे
तेनतान्नसाधना यामस्य च्छेदके व्याप्तिव्याप्तिप्रसंगइत्याशंकते। साधनेति। सद्धेतौ व्यधिकरणधर्मावच्छि
न्नाभावानाम्मेव साधनसमानाधिकरणतया तादृशाभावकूटाधिकरणं अगदे व्यभिचारिणि च साध्यता
वच्छेदकावच्छिन्नसाध्याभावस्यापि तथा त्वात्तादृशाभावकूटाधिकरणनिःसाध्यमेव। साधनसामाना
धिकरण्योपलक्षिताभावाधिकरणत्वमेव निवेश्यं न तु मद्धि शिष्टाधिकरणत्वेन व्यतिरेकिणि हेतावदोषा
दधिकरणवृत्तित्वावच्छिन्नाभावस्य वृत्तिमत्त्वं सत्त्वेपि नाव्याप्तिः। साधनसमानाधिकरण्यं च साध
नतावच्छेदकसंबंधेन साधनतावच्छेदकविशिष्टवृत्तित्वं तेन द्रव्यत्वादेः कालिकसंबंधेनाधिकरणस्य च
कोसत्ताधिकरणे गुणादौ च द्रव्यत्वपृथिवीत्वान्यतरत्वावच्छिन्नाभावस्य सत्त्वेपि द्रव्यत्वपृथिवीत्वान्यतरादि
साध्यके द्रव्यत्वद्रव्यवृत्तित्वविशिष्टसत्त्वादौ नाव्याप्तिः। न च सत्तायां साध्याभावकूटवद्गुणादिवृत्तित्वसत्ता

गा॰ दी॰ शि॰
९७

द्विशिष्टसत्ताभावस्य तुल्यत्वसत्त्वयानोपदर्शितसाध्यके विशिष्टसत्त्वेऽतिव्याप्तिप्रसक्तेरित्यत आह। साधनतावच्छे
दकावच्छिन्नतानिवेशे द्रव्यत्वादिसाध्यक विशिष्टसत्त्वे व्याप्तिवारणाय साधनतावच्छेदकसाध्याभावकूट
वृत्तितावच्छेदकताभावनिवेशस्यावश्यकत्वादुक्तरीत्यैवातिव्याप्तिप्रसक्तेः। संयोगे साध्ये संयोगत्वा
वाद्यते तां [illegible] संयोगत्वावच्छिन्नसंयोगाभावस्याप्रसिद्धिका वच्छेदेन साधनवत्ते वृत्तेर्व्याप्यवृत्तित्वे
त्वविशिष्टस्याधिकरणे गुणादौ संयोगेन वृत्तेरप्रसिद्ध्याव्याप्तिः संयोगी सत्त्वादित्यादौ जगत एव संयोगा
भाववत्त्वेनातिव्याप्तिवारणाय व्याप्यवृत्तित्वविशिष्टाभाववत्त्वानिवेशनस्यावश्यकत्वादित्यतोऽनवच्छि
न्नेवृत्तित्वत्र भवेत्स्या। साध्यसाधनसमानाधिकरणत्वेन साध्याभावविशेषितेऽपि सत्तावान् जातेरित्यादा
वव्याप्तिवारणमशक्यमेवमतेकं साधनसमानाधिकरणाभ्यां द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्ववि
शिष्टसत्ताभावाभ्यां घटिताभावसमुदायस्य सामान्याद्यवृत्तेरत्र च तुल्यावच्छेदकसंबंधेन वृत्ते
रप्रसिद्धेः। यत्तु द्रव्यत्वादिविशिष्टसत्ताभावप्रतियोगितावच्छेदककोटौ सत्तात्वेन निवेशयतेऽद्रव्यत्वादिवि
शिष्टसमानसत्त्वेन तत्प्रतियोगितावच्छेदकत्वसंभवात्प्रतिद्रव्यत्वादिसाधारणद्रव्यत्वादिविशिष्टाभावीय
भतत्प्रतियोगितायाः सत्तात्वसमनियतत्वविरहान्न तादृशाभावस्य लक्षणघटकत्वमिति समाधानं तदति
तुच्छं। द्रव्यत्वविशिष्टसत्तावान् जातेरित्यादावपि तादृशसत्तासाध्यतावच्छेदकतादृशविशिष्टसत्तात्वस्या

राम
९७

वप्रतियोगितानवच्छेदकत्वाद्द्रव्यत्वादिवैशिष्ट्यानवच्छिन्नसत्ताभावस्य साध्यतावच्छेदकसमनियतप्रतियोगि
ताकत्वाभावाधिकरणधर्मावच्छिन्नसत्ताभावमादायैवातिव्याप्तेर्दुर्वारतया एतल्लक्षणवृत्त्यादिनापि धर्मस्य सत्ता
वप्रतियोगितावच्छेदकत्वमतस्यावलंबनीयत्वात् द्रव्यत्वविशिष्टसत्तात्वादेः प्रतियोगितानवच्छेदकत्वेऽपि
समवेतत्वजातिमत्त्वादौ समवायेन एतद्रूपान्यत्वविशिष्टाभावतद्रूपान्यत्वविशिष्टाभावादीनां समवेतत्वसम
नियतप्रतियोगिताकतया प्रत्येकं साधनसमानाधिकरणत्वाच्च तेषु टिकेष्वधिकरणे सामान्यादौ हेतुता
वच्छेदकसंबंधेन वृत्तेरप्रसिद्ध्या व्याप्तिवारणासंभवात्। एवं विशिष्टस्यातिरिक्तताभ्युपगमेऽवलंबनाद्दर्शिता विशि
ष्टाभावानां साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहोपपादनेन समाधानमपि [illegible] उक्तरूपेण
वद्रव्यत्वतदन्यसमवेतोभयगुणत्वतदन्यसमवेतोभयकर्मत्वतदन्यसमवेतोभयाभावानां साध्यतावच्छेद
कसमवेतत्वसमनियतप्रतियोगिताकानां प्रत्येकं साधनसमानाधिकरणानां समुदायवृत्तित्वे सामान्यादौ सम
वायेन वृत्तेरप्रसिद्ध्या व्याप्तेस्तादवस्थ्यापत्तिवारणासंभवात्। न च यादृशसाध्याभावसमुदायाधिकरणं साधना
धिकरणं तादृशसमुदायाधिकरणवृत्तित्वाभावस्य विवक्षितत्वात् उक्ताभावसमुदायाधिकरणतायाः सा
धनवत्यसंभवात् न तत्समुदायस्य लक्षणघटकत्वमिति नाप्रसिद्धिरिति वाच्यं एवं सत्यपि तादृशविशिष्टाभा
वापेक्षतरघटितव्यधिकरणधर्मावच्छिन्नाभाववत्त्वोपस्थितादृशसाध्याधिकरणे केषांचिद्धनिमतामहत्तेः

साधनस्य वह्नेरव्याप्तिस्तादवस्थ्यात्। एतादृशविवक्षानुसरणे च तत्तत्संबंधान्यतराभाववत्त्वस्य घटवदन्यत्वा
दित्यत्र तत्तत्संबंधेन घटितसाध्याभावकूटवत्तिवृत्तित्वरूपस्य वक्ष्यमाणान्वयव्याप्तेरप्रसंगात्। साधनेव
तोनिःस्वरूपस्य कस्य चिदपि तादृशाभावघटितस्यासाधिकरणत्वविरहात् तादृशाभावस्य लक्षणघटकत्वात्
प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणे चैवमपि तेन पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादि
साध्यकत्वानि तत्तज्जातित्वाद्यवच्छिन्नाभावघटितकूटवत्त्वस्य क्वचिदपि साधनवत्यसत्त्वेन तादृशाभावकूटस्य लक्ष
णाघटकत्वात् यादृशाभावकूटवत्त्वं साधनवति न तादृशवृत्तित्वाभाववत्त्वस्य साधने संभावितत्वादित्याति व्याप्तिर्न वेकारणाद
र्शिवेत्यत आहुः। साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वेन साध्याभाववि
शेषणादुपदर्शितविशिष्टाभावनिरासः। गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्न
सत्ताद्यभावस्य संग्रहाय अवच्छिन्नान्तं इति निरवच्छिन्नाभावाद्या। अन्यथा संयोगी सत्त्वादित्यादौ संयोगत्वावच्छिन्नसंयो
गाद्यभावस्य साध्यवद्वृत्तितया व्यधिकरणधर्मावच्छिन्नस्यैव तस्य लक्षणघटकत्वेनातिव्याप्त्यापत्तेः। समुक्ता साधन
समानाधिकरणस्य साध्यवद्वृत्त्यन्यस्याप्रसिद्धिः समानाधिकरणधर्मावच्छिन्नभिन्नतया च व्यधिकरणधर्मावच्छिन्न
साध्याभाववैशिष्ट्यसंदर्भसिद्धिः। न चैवं साध्यतावच्छेदकव्यापकत्वं प्रतियोगिताविशेषणं व्यर्थं असाववान्मेय
त्वादित्यादौ घटत्वादिरूपाभावस्योक्तविशेषणेनैव व्यावर्त्तनादिति वाच्यं प्रमेयसाध्यकस्थले घटत्वपटत्वाद्य

भावावच्छिन्नभावकस्य प्रमेयसामान्याभावस्य गगनत्वाद्यवच्छिन्नगगनाद्यभावभिन्नस्य संग्रहाय साध्यता
वच्छेदकव्यापकत्वेन समानाधिकरणधर्मस्य विशेषणं निवेशनीयं तया घटत्वादिरूपाभावप्रतियोगितावच्छे
दकघटत्वाद्यभावत्वादेश्चाभावत्वाव्यापकत्वेन घटत्वादौ विशिष्टसंदर्भस्याक्षतत्वात्। एतादृशविशेषणेन तस्य व्याह
तेः। न च वाच्यत्वादिसाध्यकस्थले घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावस्य संयोगादिरूपव्यधिकरणसंबंधा
वच्छिन्नवाच्यत्वाद्यभावाभिन्नतया साध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताक
त्वमक्षतमिति तत्संग्रहाय समानाधिकरणसंबंधावच्छिन्नत्वस्य समानाधिकरणधर्मावच्छिन्नाभावप्र
तियोगित्वविशेषणतया आवश्यकत्वात् प्रमेयसाध्यकस्थलीयोक्ताभावस्य व्यधिकरणसंबंधावच्छि
न्नगगनाद्यभावाभिन्नत्वेपि प्रतियोगितावच्छेदकधर्मे साध्यतावच्छेदकव्यापकत्वविशेषणमन्तरेण
वैशिष्ट्यसिद्धत्वमव्याहतमिति वाच्यं। एवमपि गगनत्वादिना प्रमेयसामान्याभावस्य समानाधिक
रणधर्मतादृशसंबंधावच्छिन्नप्रतियोगिताकतया उक्ताभावस्य तद्भिन्नत्वेन तन्न विशिष्टसंदर्भनिवृत्ति
यतादृशविशेषणस्यावश्यकत्वात्। समानाधिकरणसंबंधावच्छिन्नत्वविशेषणपरित्यज्य साध्यतावच्छेद
कसंबंधावच्छिन्नत्वं प्रतियोगितायां निवेश्य तत्कार्यस्य साध्यतावच्छेदकव्यापकत्वरूपप्रतियोगितावच्छे
दकविशेषणसार्थकत्वस्य चोपपादनसंभवाच्च। साध्यवद्वृत्तितादृशाभावस्य प्रमेयत्वादिना साध्याभा

वर्त्तमानसिद्धस्तत्रिकाविंशतिरनुपपत्तिः एतेननीलरूपघटत्वोभयाभाववान्नीलघटान्यत्वादित्यादौसाधनसमा
नाधिकरणनीलरूपंचघटत्वंचइतितादृशनीलरूपघटत्वात्मकसाध्याभावघटितकूटाधिकरणाप्रसि
द्ध्याव्याप्तिरित्यपिनिरस्तं तादृशाभावेउक्तभेदासत्वेनव्यधिकरणधर्मावच्छिन्नाभावस्यैवलक्षणघटकत्वा
त् एवंघटवृत्तित्वविशिष्टाकाशाभावाभाववत्साध्यमेयत्वादिहेतौसाध्याभावस्यविशिष्टाकाशाभावादेरा
काशाभावानतिरिक्ततयाजगतएवसाध्याभावकूटाधिकरणतापत्त्यातिव्याप्तिरितिसाध्याभावत्वविशिष्टा
धिकरणत्वमेवविवक्षणीयंतथाचपटघटवृत्तित्वविशिष्टाकाशाभावाभाववानास्तीत्यादिप्रतीत्याभावाद
पटादेर्नतादृशविशिष्टाभावाधिकरणत्वमितिनदोषः एवंचसाधनाधिकरणेपिसाध्याभावत्वेनवृत्तित्वविवि
क्षणीया अन्यथाजातिमदन्यत्वविशिष्टाकाशाभावस्याभाववत्साध्येसमवायेनहेतौसाधनसमानाधिकर
णाकाशाभावस्यसाध्याभावत्वविशिष्टस्याधिकरणेसामान्यादौसमवायेनवृत्तेरप्रसिद्धत्वादव्याप्त्या
पत्तेस्तादृशविवक्षयाप्युक्तोभयाभावसाध्यकस्थलेव्यभिचारांशेसंलवतिप्रत्येकाधिकरणेउभयाभावा
भावत्वेनावृत्तेः वस्तुतोघटवृत्तित्वविशिष्टाकाशाभावाघाभावोघटत्वाघाभावसमनियततयातदभिन्नइति
घटत्वादिरपितदभावः इत्थंचतद्घटितकूटाधिकरणतान्जगतइतितदप्रतीतिव्याप्त्यनवकाशात्साध्या
भावत्वविशिष्टाधिकरणाविवक्षणमफलंसाध्याभावत्वेनसाधनवद्वृत्तित्वंतुसाध्याभावत्वविशिष्टाधिक

राम
९९

रणत्वाविवक्षणेपिघटान्यत्वविशिष्टद्रव्यत्वाभाववान्घटत्वादित्यत्रसाध्याभावस्यद्रव्यत्वस्यद्रव्यत्वत्वादिना
साधनसमानाधिकरणतयाद्रव्यस्यैवतद्घटितकूटाधिकरणत्वेनाव्याप्तिवारणायनिवेशनीयमेवानचैवमपि
पृथिव्यन्यद्रव्यत्ववान्द्रव्यत्वादित्यादौसाध्यतावच्छेदकविशिष्टद्रव्यत्वस्य प्रत्येकंसाधनसमानाधिकरणा
त्वाघटान्यत्वविशिष्टद्रव्यत्वाभावघटेतरपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावयोरधिकरणगुणादिरेवेत्यति
व्याप्तिर्दुर्वारैवेतिवाच्यं विशिष्टस्यातिरिक्ततापक्षमेकदेशैवतादृशातिप्रसंगस्यसमाधानस्यमानत्वा
दिति प्रमेयत्वमननत्वाद्योरिति उभयत्वावच्छिन्नाभावस्यसाध्यत्वेहेतौव्यभिचारित्वाभावादन्यतरत्वाव
च्छिन्नाभावस्यसाध्यत्वानुसरणं पृथिव्याप्तावितिआकाशेप्रमेयत्वस्यमनसिचमननत्वस्यसाधनसमा
नाधिकरणतया आकाशस्यमनसःप्रत्येकंतदुभयानधिकरणत्वेनसाध्याभावसमुदायानधिकरणा
त्वादितिभावः आदिशब्दात्प्रमेयत्वमननत्वभिन्नान्यतराभाववान्प्रमेयत्वमननत्वान्यतरत्वादित्यादौ
कसाध्याभावघटितसमुदायेवातिकाकदिगादेहितार इत्यातिव्याप्तेःपरिग्रहः ननुसाधनाधिकरणेयेषांपर
कसाध्याभावघटितसमुदायस्यविवक्षितत्वान्नायंदोषः प्रमेयत्वमननत्वाद्योः प्रत्येकंसाधनसमानाधिकर अथवा
स्परमेकाधिकरण्यतत्समुदायस्याविवक्षितत्वान्नायंदोषः तदेकतरघटितकू
णत्वेपिसाधनवत्तिपरस्परमेकाधिकरण्याभावेनतदुभयघटितेकूटस्येलक्षणाघटकत्वात् एवंच
रस्यैवतथात्वात्तद्वृत्तित्वहेतावृत्तेः प्रतियोगितायांसाध्यतावच्छेदकव्याप्यत्वविशेषणंत्याज्यमेवा

दापादितलक्षणत्वात्
नातिव्याप्तिः साध
नस॰ अभावे लिख

पतीतर

श्री·शि·टी·
१००

विशिष्टस्यानतिरिक्ततयेपि पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौ नोक्तरीत्यातिव्याप्तिः संभवति उक्तविशिष्टा
भावानां साधनवति द्रव्यादावेकाधिकरण्यासंभवात् एवं तादृशकूटाधिकरणपृथिव्यादिवृत्तित्वस्य द्रव्यहे
त्वादिनायाभावस्तु रूपापि तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकयावदभावागतत्वात् तद्विरहादपु
क्ते तेनातिव्याप्तिसंभवः न च द्रव्यवृत्तित्वावच्छिन्नाभावप्रतियोगितायाआकाशादिवृत्तित्वसाधारणत
यातादृशवृत्तित्वत्वाव्याप्यत्वात् तादृशाभावोपि साधकः तथा च साधनसमानाधिकरणत्वस्य सा
ध्याभावविशेषणतापक्षे प्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणव्यावृत्त्यसंभवेन तादृशविशेष
णस्य परित्याज्यत्वात् वह्निमान् धूमादित्यत्रालोकादिवृत्तित्वरूपेण निवेशे वृत्तित्वाभावस्य प्रतियोगितायां
आलोकादिनिष्ठपर्वतादिवृत्तित्वसाधारण्यात् साधनसमानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्व
तं प्रत्यव्यापकतयैव तादृशाभावव्यावर्त्तनात् व्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य प्रतियोगिताविशेषणात्
पर्वतसंयुक्तत्वपर्वतान्यसंयुक्तत्वोभयत्वावच्छिन्नाभावस्य पर्वतासंयुक्तघटादौ वर्त्तमानस्य धर्मादानसं
चेपि न क्षतिः प्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणोपि तादृशाभावमादाय व्याप्तेरवक्ष्यमाण
यादृतस्य विशेषणस्य लिङ्गविशेषणसत्त्वेपि आवश्यकत्वात् चरमाभावप्रतियोगितायां तादृशवृत्तित्वस्य व्या
प्यत्वविशेषणत्यागे साधनाधिकरणवृत्तिसाध्याभावसमुदायाविवक्षणेपि प्रथमाभावप्रतियोगितायां

राम
१००